# विविधशास्त्राणामाकरस्वरूपो निरुक्तग्रन्थः– एकमन्वीक्षणम्

M.Phil. Dissertation

Submitted by
Sutapa Mondal
Class Roll No. 001701203006
Examination Roll No. MPSA194006
Session 2017-2019
Registration No. 111306 of 2010-2011

Supervisor
Dr. Kakali Ghosh
Department of Sanskrit,
Jadavpur University
2019

FACULTY OF ARTS
DEPARTMENT OF SANSKRIT
JADAVPUR UNIVERSITY
KOLKATA- 700032

## DECLARATION BY THE STUDENT

This is to certify that the dissertation entitled "विविधशास्त्राणामाकरस्वरूपो निरुक्तग्रन्थः–एकमन्वीक्षणम् " submitted by me (Class Roll No. 001701203006 Exam Roll No. MPSA194006 Reg No. 111306 of 2010-2011) for the M.Phil. Degree (Arts) in Sanskrit, at Jadavpur University. The dissertation has been prepared under the supervision of Dr. Kakali Ghosh and neither this dissertation nor any part of it has been submitted before for any degree or diploma anywhere/elsewhere.

________________________

Signature of the candidate

Countersigned by

__________________________________

(Supervisor)

Dr. Kakali Ghosh
Associate Professor,
Department of Sanskrit
Jadavpur University

FACULTY OF ARTS
DEPARTMENT OF SANSKRIT
JADAVPUR UNIVERSITY
KOLKATA-700032, INDIA

**TO WHOM IT MAY CONCERN**

This is to certify that the thesis entitled "विविधशास्त्राणामाकरस्वरूपो निरुक्तग्रन्थः–एकमन्वीक्षणम्" submitted by Sutapa Mondal be accepted in partial fulfillment of the requirements for awarding the degree of Master of Philosophy under Department of Sanskrit of Jadavpur University.

Dr. Kakali Ghosh
Supervisor
Associate Professor
Department of Sanskrit
Jadavpur University

Dr. Ashok Kumar Mahata
Associate Professor and Head
Department of Sanskrit
Jadavpur University

# मुखबन्धः

अखिले संसारेऽस्मिन्नेतादृशं तत्त्वमस्ति यत् संस्कृतसाहित्ये नास्ति इति केनापि न वक्तुं शक्यते। सर्वाण्यपि तत्त्वानि मुनिऋषिभिः प्रतिपादितानि। यास्काचार्येण विरचितं निरुक्तम् षट्सु वेदाङ्गेष्वन्यतममिति। वैदिकमन्त्राणामर्थबोधाय रचितेऽपि ग्रन्थेऽस्मिन् विविधानां वैज्ञानिकशास्त्रानां तत्त्वान्यपि प्राप्यन्ते। एम्.फिल्. गवेषणावसरे तेषां कतिपयानां विषयानां सम्यक् पर्यालोचनमेव मम प्राथमिकलक्ष्यं भवेत्। अपि च निरुक्तग्रन्थनिबद्ध–निर्वचनादिकमाश्रित्य प्राचीनभारतीयवैज्ञानिकभावनाया उद्घाटनं तत्सहायेन पुनरुत्तरकालिक–चिन्तनप्रक्रियाया उपचयः संभवो न वेति विचारोऽपि मम गवेषणस्य लक्ष्यं स्यात्।

मम मातृसदृशा बहुशास्त्रनिष्णाता संस्कृतजगति प्रोज्ज्वला नक्षत्ररूपा तत्त्वावधायिका डा. काकलीघोषमहोदया विषयेऽस्मिन् गवेषणाकार्ये मह्यमुपदिष्टवती। तस्या एव पाण्डित्यपूर्णालोचनां निशम्याहमतीव प्रेरणां लब्धवती।

अमरेश्वर–ठाकुरमहोदयैः संपादितस्य कलिकाता–विश्वविद्यालयतः प्रकाशितस्य खण्डचतुष्टयात्मकस्य वङ्गभाषयानुदितस्य निरुक्तग्रन्थस्य सहायतां प्राप्नोमि। संकृतसाहित्यपरिषदि ग्रन्थागारे संरक्षिते दुष्प्राप्यग्रन्थसमूहपठनेनोपकृतास्मि। अपि च यादवपुरविश्वविद्यालयस्य संस्कृतविभागीयग्रन्थागारस्य तथा केन्द्रीयग्रन्थागारस्य सहयोगिता प्राप्ता। संस्कृतविभागीयाध्यापकाध्यापिकानामनुप्रेरणा मम कार्यस्य सहायिका जाता। नमः पितृभ्यां याभ्यां विना मत्कार्यसंपादनं न संभवेत्। मुद्रणयन्त्रागारस्य सर्वेभ्यः कर्मिभ्यश्च शुभेच्छां ज्ञापयामि। सर्वेभ्यो मम हार्दिककृतज्ञतां समर्पयामीत्यलमतिविस्तरेणेति शम्।

*******

# विषय–सूची


| | | पृष्ठाङ्कः |
|---|---|---|
| | **मुखबन्धः** | **1** |
| | **विषयसूची** | **2** |
| | **List of Abbreviations and Short Titles** | **3-4** |
| **प्रथमोऽध्यायः** | उपोद्घातः | **5-6** |
| **द्वितीयोऽध्यायः** | वेदाङ्गेषु निरुक्तस्य स्थानम् | **7-26** |
| **तृतीयोऽध्यायः** | निरुक्तग्रन्थे जीवविद्यायाः तत्त्वानि | **27-60** |
| **चतुर्थोऽध्यायः** | निरुक्तग्रन्थे भौगोलिक–तत्त्वानि | **61-87** |
| **पञ्चमोऽध्यायः** | निरुक्तग्रन्थे भौतवैज्ञानिक–तत्त्वानि | **88-93** |
| **षष्ठोऽध्यायः** | उपसंहृतिः | **94-95** |
| | **Select Bibliography** | **96-101** |

## List of Abbreviations and Short Titles

| | | |
|---|---|---|
| आ.ज्यो. | : | आर्चज्योतिषम् |
| ऋ.भा. | : | ऋग्वेदभाष्योपक्रमः |
| ऊ.सं. | : | ऊनविंशतिसंहिता |
| ऐ.ब्रा. | : | ऐतरेयब्राह्मणम् |
| गु.मु. | : | गुरुशंकरमुखोपाध्यायः |
| ज्ञा.श. | : | ज्ञानप्रकाश–शास्त्री |
| ठाकुरः | : | अमरेश्वरठाकुरः |
| तै.उ. | : | तैत्तिरीयोपनिषद् |
| तै.सं | : | तैत्तिरीयसंहिता |
| नि. | : | निरुक्तम् |
| नि.भा. | : | निरुक्तभाष्यटीका |
| नि.श्लो.वा. | : | निरुक्तश्लोकवार्त्तिकम् |
| पा.शि. | : | पाणिनीयशिक्षा |
| पृ. | : | पृष्ठाङ्कः |

म.भा. : महाभाष्यम्

मु.उ. : मुण्डकोपनिषद्

मु.श. : मुकुन्दझा शर्मन्

ल.स्व. : लक्ष्मणस्वरूपः

शा.च. : शारदा चतुर्वेदी

षड्.व्रा. : षड्विंशब्राह्मणम्

संपा. : संपादकः

सि.कौ. : सिद्धान्तकौमुदी

BY : Bengali Year

Comm./comm.: Commentary

Imp. : Impression

MLBD : Motilal Banarasi Dass Publishers Pvt. Ltd.

*******

# प्रथमोऽध्यायः

## उपोद्घातः

संस्कृतसाहित्यस्य छात्रारूपेणाध्ययनकाले स्नातकोत्तरविभागे वेद इति विशेषपत्रं मया गृहीतम्। तदा वैदिकसाहित्यान्तर्गतविविधविषयान् प्रति ममोत्साहो जायते। विशेषरूपेण वेदाङ्गानि मम ज्ञानतृष्णां वर्धयन्ति। परवर्तिनि काले गवेषणकार्यं वेदाङ्गविषय एव कुर्यादिति मम मनसि सुप्ताशा संजाता। तदन्तरं दिष्ट्या एम्. फिल्. इति शिक्षावर्षे अध्ययनायावसरं प्राप्नोमि। तत्रैव पूर्वकृता सुप्ताशा वास्तवरूपं पूर्णरूपं वा प्राप्नोति। गवेषणप्रबन्धस्य विषयरूपेण निरुक्तवेदाङ्गं चिनोमि। वैदिकमन्त्राणामर्थबोधकरूपेण रचितेऽस्मिन् शास्त्रे विविधशास्त्राणां तत्त्वानि मिलितानि। तेषु प्राचीनवैज्ञानिकशास्त्रान्तर्गतानां तत्त्वानामुद्घाटनं पुनश्चाधुनिकविज्ञानभावनया सह संयोगस्थापनं समृद्धकरणं च ममोद्देश्यमिति।

मम गवेषणप्रबन्धस्य नाम भवति– विविधशास्त्राणामाकरस्वरूपो निरुक्तग्रन्थः–एकमन्वीक्षणम्। विषयोऽयमुपोद्घातोपसंहृतिसह षष्ठसंख्यकेष्वध्यायेषु विभज्यते। ते यथा–

प्रथमोऽध्यायः उपोद्घातः

द्वितीयोऽध्यायः वेदाङ्गेषु निरुक्तस्य स्थानम्

तृतीयोऽध्यायः निरुक्तग्रन्थे जीवविद्यायाः तत्त्वानि

चतुर्थोऽध्यायः निरुक्तग्रन्थे भौगोलिकतत्त्वानि

पञ्चमोऽध्यायः निरुक्तग्रन्थे भौतवैज्ञानिकतत्त्वानि

षष्ठोऽध्यायः उपसंहृतिः

तत्र द्वितीयाध्याये वेदाङ्गेषु निरुक्तस्य स्थानं किं तदालोच्यते। तृतीये तु यानि जीवविद्यायाः तत्त्वानि सन्ति, तेषामन्वेषणमाधुनिकभावनया सह संगतिविधानमस्ति। अत्र जीवविद्यायाः तत्त्वरूपेण यथाक्रमेण उद्भिद्विद्यायाः तत्त्वानि, प्राणिविद्यायाः तत्त्वानि, अणुजीवविद्यायाः तत्त्वानि, पुनश्च शारीरविद्यायाः चिकित्साशास्त्रस्यापि कानिचन तत्त्वानि सन्ति। चतुर्थे च भौगोलिकतत्त्वानि विद्यन्ते, यद्यप्यत्र प्राकृतिकभूगोलशास्त्रस्य तत्त्वान्येव मयोपस्थाप्यन्ते। अपि चान्तिमरूपेणोल्लिख्यन्ते भौतवैज्ञानिकतत्त्वानि। अत्रापि केवलं पदार्थविद्यान्त–र्गततत्त्वेषु कानिचिदवलम्ब्य नातिदीर्घा वर्णना क्रियते।

अस्मिन् गवेषणाप्रबन्धे तत्त्वानुसंधानार्थं शोभनमुपस्थापनार्थं च यथासाध्यं चेष्टयामि। आशास्महे यत्, प्रबन्धोऽयं उत्तरकालिकशोधार्थिनां कृते सहायको भवति।

*******

# द्वितीयोऽध्यायः

# वेदाङ्गेषु निरुक्तस्य स्थानम्

प्राचीनभारतवर्षस्य सभ्यतासंस्कृत्योः मूलाधारग्रन्थो वेद इति। रामायणविरचनात्प्राक् वेदविषयकं सर्वं साहित्यं वैदिकसाहित्यमिति नाम्ना ज्ञायते। न केवलं भारतीयसाहित्ये विश्वसाहित्येऽपि तस्य विशेषस्थानमस्ति। वैदिकसाहित्येषु भारतीयानां सामाजिक–राजनैतिकार्थनैतिकविषयाः, धर्मदर्शने, ज्ञानविज्ञाने, सदाचारसंस्कृती चेत्यादीनां संपूर्ण विवरणमस्ति।

ज्ञानार्थकाद् विद्–धातोरुत्तरं घञ्–प्रत्यययोगे वेदशब्दस्य निष्पत्तिः। तस्यान्तर्निहितार्थो ज्ञानमिति। सिद्धान्तकौमुद्यां विद्–धातोरर्थचतुष्टं स्वीक्रियते। उक्तं यत्–

**सत्तायां विद्यते, ज्ञाने वेत्ति, विन्ते विचारणे।**
**विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्।**[1]

अर्थादत्र विद्–धातुः सत्त–ज्ञान–विचार–लब्धार्थानां द्योतक इति। अस्माद् विद्–धातोः वेदशब्दस्योत्पत्तिरित्युक्तम्। वेदशब्दस्य व्युत्पत्तिप्रसङ्गे स्वामी दयानन्दमहोदयस्योक्तिर्भवति– ज्ञानार्थकविद् इति धातोरुत्तरम् अच्–प्रत्यययोगेन निष्पन्नः शब्दो वेदः; येन वस्तुनां यथार्थस्वरूपं गृह्यत इति। ज्ञानार्थकाद् विद् इति धातोरुत्तरम् अच् इति प्रत्यययोगाद् वेदशब्दस्य निष्पत्तिः; येन धर्मब्रह्मणोः ज्ञानं जायते। विचारार्थक–विद्–धातोरच्–प्रत्यययोगेनो व्युत्पन्नो वेद इति शब्दः; अर्थाद्येन धर्मब्रह्मणोः विचारो भवतीति। लाभार्थकविद् इति धातोरुत्तरम् अच्–प्रत्यययोगाद् वेदशब्दो निष्पन्नः; अर्थाद्येन ब्रह्मणो यथार्थस्वरूपलाभो संभवतीति। अतो वक्तुमिदं शक्यते यदतीन्द्रियपरमज्ञानं येन ग्रन्थेन लभ्यते सो वेदनामवाच्यः।

मन्त्राणां समाहारः संहितानाम्ना ज्ञायते। संहिताशब्दस्यार्थः संग्रह इति। संहितानुसारेण चत्वारो वेदाः। ता यथा– ऋक्संहिता, यजुःसंहिता, सामसंहिताथर्वसंहिता च। मन्त्रब्राह्मणात्मकस्य वेदस्य त्रयो भेदाः सन्ति। ता यथा– ब्राह्मनमारण्यकमुपनिषत् चेति।

अतो वेदस्य विभाजनं भवति–आदौ वेदस्य भेदद्वयं विद्यते, मन्त्रब्राह्मणेति च। पुनर्मन्त्रभागस्य भेदचतुष्टयमस्ति, ऋग्वेदो यजुर्वेदः, सामवेदोऽथर्ववेदश्चेति। ब्राह्मणस्यापि विभागत्रयं दृश्यते, ब्राह्मणमारण्यकमुपनिसत् चेति। परन्तु वैदिकसाहित्यस्य व्याप्तिरितोऽप्यधिक इति। वेदाङ्ग–सूत्रसाहित्यानुक्रमन्योऽपि वैदिकसाहित्यस्याङ्गस्वरूपाः। वेदस्याध्ययनमध्यापनामननमर्थबोधैः सहायकमुपकारकं शास्त्रं वेदाङ्गमिति। यद्यपि प्राचीनमतानुसारेण वेदा अपौरुषेयाः तथापि वेदाङ्गानि पुरुषविरचितानीति ते मन्यन्ते। तानि ऋषिभिर्विरचितानि। केषांचिद् नामान्यपि प्राप्यन्ते।

वेदाङ्गानि वेदस्याङ्गस्वरूपानि। अङ्ग्या उपकारकमङ्गमुच्यते; तस्माद्वेदोऽङ्गीस्वरूपः वेदाङ्गसमूहोऽङ्गरूप इति। यथाङ्गसमूहेनाङ्ग्याः पूर्णता संभवति तथा वेदाङ्गानां समाहारेण वेदः संपूर्णो भवति।

षट् वेदाङ्गानि, तानि यथा– शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषं चेति। तेषु शिक्षाछन्दोभ्यां वेदस्य निर्भुलः पाठः संभवति। कल्पज्योतिषे वैदिकयागानुष्ठाने सहायके भवतः। निरुक्तव्याकरणाभ्यां वैदिकमन्त्राणां सम्यगर्थज्ञानं जायते। पाणिनीयाशिक्षाग्रन्थे वेदः पुरुषरूपेण कल्प्यते, अपि च वेदाङ्गानि तस्याङ्गानीति। तेनोक्तं यत्–

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते**
**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।**[2]

षडङ्गशास्त्राणि षट्विद्यास्वरूपाणीति। मुण्डकोपनिषदि वेदाङ्गान्यपराविद्या–रूपेणोल्लिखितानि। तत्रोक्तं यत्–

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।**[3]

अर्थात् चतुर्वेदेन सह षट् वेदाङ्गान्यपराविद्यारूपेण स्वीकृतानि। सामवेदस्य षड्विंशब्राह्मणे वेदाङ्गानां प्रथमोल्लेखः दृश्यते, अतो मन्यते यदुपनिषत्पूर्ववर्त्तिनि ब्राह्मणयुग एव वेदाङ्गानि प्रचलितानीति। उक्तं यत्–

**चत्वारोऽस्यै वेदाः शरीरंषडङ्गान्यङ्गानि।**[4]

अर्थाच्चतुर्वेदस्तस्य शरीरं षड्वेदाङ्गान्यङ्गनीति। किंच प्रतीच्यपण्डितानां मतानुसारेण वेदाङ्गान्युपनिषदुत्तरवर्त्तिनि। म्याक्स् मुल्लेर् (Max Müller) इति पाश्चात्यपण्डितेनोक्तं आनुमानिक ६०० इत्यारभ्य २०० खिस्टाब्दस्यान्तर्वर्त्तिनिकाले वेदाङ्गानि विरचितानि। म्याक्डोनेल्महोदयस्य मते ५००–२०० खिस्टपूर्वाब्द आसीद्वेदाङ्गानां विरचनकालः।

**वेदाङ्गानामालोचनम्–**

**शिक्षावेदाङ्गम्–**

वेदाङ्गेषु शिक्षा इति वेदाङ्गमन्यतममिति। पाणिनीयशिक्षाग्रन्थे शिक्षावेदाङ्गं वेदपुरुषस्य घ्राणेन्द्रियरूपेण कल्पितमिति। नासिकया विना पुरुषस्य श्वसनक्रिया न संभवति, श्वसनव्यतिरेकेन प्राणधारणमपि प्रतिकूलं भवति, तद्वत् शिक्षावेदाङ्गमपाय वैदिकमन्त्राणां यथार्थोच्चारणं न स्यात्। शिक्षावेदाङ्गं धनिविज्ञानमिति नाम्ना ज्ञायते। शास्त्रेऽस्मिन् वैदिकमन्त्रान्तर्गतवर्णस्वरमात्रादीनां सम्यगुच्चारणविधिरुपदिश्यते। मन्त्राणां यथार्थोच्चारणार्थं ह्रस्वादिभेदेन स्वरमात्राया भिन्नत्वम्, उदात्तानुदात्तस्वरितानां स्वराणामु–च्चारणम्, विविधवर्णानामुच्चारणस्थानप्रयत्नयोर्ज्ञानमावश्यकमिति। तानि तत्रालोचितानि। सायणाचार्येण शिक्षावेदाङ्गस्य लक्षणरूपेणोक्तम्–

**स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्षते उपदिशते सा शिक्षा।**[5]

तैत्तिरीयोपनिषदि शिक्षायाः षडङ्गान्युल्लिखितानि। तानि यथा– वर्णस्वरमात्रावलसामसन्ताना इत्यादयो विषयाः। उक्तं यत्–

**शिक्षां व्याख्यासामः। वर्णः स्वरः। मात्रा बलम्। साम सन्तानः। इत्युक्तः शीक्षाध्यायः।**[6]

तस्माद् ज्ञायते यत्तदा वेदेन सहाङ्गशास्त्रमप्युपदिष्टमिति। उपनिषद्येव शिक्षायाः सर्वे विषया वर्णिताः। उत्तरकाले तं विषयमाश्रित्य आचार्येण स्वस्य विश्लेषणं सिद्धान्तञ्चोपस्थाप्येते।

**वर्णः–**

वर्ण इत्युक्ते अकाराद्यक्षरो द्योत्यते। वेदार्थज्ञाने वर्णज्ञानमावश्यकम्। पाणिनीयशिक्षायां त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः स्वीकृताः। उक्तं यत्–

**त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।**[7]

**स्वरः–**

वैदिकमन्त्रोच्चारणे स्वराणामतीव गुरुत्वमस्ति। त्रयः स्वराः, उदात्तानुदात्तस्वरितश्चेति। पाणिनिनोक्तम्–

**“उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः”**[8]**।** ऋग्वेदभाष्योपक्रमणिकायामुक्तम्–**“स्वर उदात्तादिः”**[9]**।** उदात्तस्वरस्य संज्ञा भवति उच्चैरुदात्तः अर्थात्ताल्वादिषु सभागेषु स्थानेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्। नीचैरनुदात्तः, अर्थात्ताल्वादिषु स्थानेषु निम्नभागे निष्पन्नोऽजनुदात्तसंज्ञो भवति। समाहारः स्वरितोऽर्थादुदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन्, सोऽच् स्वरितसंज्ञः स्यात्।

**मात्रा–**

सायणाचार्येणोक्तं यत्– **“मात्रा ह्रस्वादिः”**[10]। स्वराणामुच्चारणकालः मात्रेति नाम्ना ज्ञायते। मात्राशब्दः स्त्रीलिङ्गवाचकः। ‘माङ् माने’धातोर्मात्राशब्दस्योत्पत्तिः। मात्रा तिस्रः– ह्रस्वो दीर्घः प्लुतश्चेति। पाणिनिमहोदयस्य मते– **“ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि”**[11]। ह्रस्वस्वर एकमात्रायुक्तो भवति, दीर्घस्वरो द्विमात्राविशिष्टः, त्रिमात्रा भवति प्लुतस्वरस्य च।

**बलम्–**

बलमित्युक्ते सायणाचार्येणोक्तम्– **"बलं स्थानप्रयत्नौ"**[12] इति। अर्थाद्वर्णामुच्चारणस्थानं प्रयत्नं चेति बलमिति। हृदयकण्ठशिरोजिह्वामूलदन्तौष्ठनासिकाताल्वादीन्यष्टावुच्चारणस्थानानि। उक्तं यत्–

**अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा।**
**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च।।**[13]

ध्वनेरुच्चारणकाले वाग्यन्त्रस्यायासं प्रयत्नमिति। बाह्याभ्यन्तरभेदेन प्रयत्नं द्विविधम्। पञ्चविधमाभ्यन्तरप्रयत्नम्, बाह्यप्रयत्नानैकादशसंख्यकानि।

**<u>सामः–</u>**

सायणाचार्येण सामशब्देन साम्यमुक्तम्। अर्थात् सामशब्दस्यार्थो भवति साम्यमिति। अतिद्रुतादिदोषमुक्तं माधुर्यादिगुणयुक्तमुच्चारणं साम इत्यभिधीयते। प्रसङ्गेऽस्मिन् महर्षिः पाणिनिरुक्तवान्–

**माधुर्य्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः।**
**धैर्य्यं लयसामर्थं च षडेते पाठकागुणाः।।**[14]

**<u>सन्तानः–</u>**

सन्तानशब्दस्यार्थः संहिता इति। पदानामेकत्रोच्चारणं संहिता इत्युच्यते **"पदप्रकृतिः संहिता"[15]** इति। यथा 'वायो आयाहि' इति स्वतन्त्रं पदद्वयं संयोगेन संहितया वा 'वायवायाहि' इति रूपं प्राप्नोति।

प्राचीनार्यसमाजे प्रचलितमिदमासीद्यत् वैदिकयागानुष्ठाने विकृतमन्त्रपाठाद्यजमानस्येष्टप्राप्तिर्न भवति, परन्तु तस्यानिष्टप्राप्तिः स्यात्। महर्षिणा पाणिनिना प्रसङ्गेऽस्मिन्नुक्तम्–

**मन्त्रोहीनः स्वरतो वर्णोतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।**[16]

तस्मात्कारणात् शिक्षावेदाङ्गस्य ज्ञानमावश्यकरूपेण परिगणितमिति।

वेदचतुष्टयाणां केषांचिच्छिक्षाग्रन्थानां नामानि निम्ने प्रदर्शितानि–

ऋग्वेदस्य पाणिनीयशिक्षा, सामवेदस्य नारदीयशिक्षान्यतमा, एतद्विहाय गौतमीशिक्षा लोमशीशिक्षा चेति। कृष्णयजुर्वेदस्य प्रधानशिक्षाग्रन्थो व्यासशिक्षा, पुनर्भारद्वाजशिक्षा माण्डव्यशिक्षापि स्तः। शुक्लयजुर्वेदान्तर्गतो याज्ञवल्क्यशिक्षाग्रन्थोऽथर्ववेदस्य माण्डूकी–शिक्षाग्रन्थ इति।

शिक्षाग्रन्थप्रसङ्गे प्रातिशाख्यग्रन्थानामुल्लेखोऽतिप्रासङ्गिकः। केचिन्मन्यते शिक्षाग्रन्थाश्रितः प्रातिशाख्यग्रन्थसमूह इति। पुनश्च केषांचिन्मते महदाकारत्वात्तयुपाङ्गग्रन्था इति। प्रातिशाख्यशब्दस्य व्युत्पत्ति प्रसङ्गे बाजसनेयीप्रातिशाख्यस्य भाष्यकारेणोक्तम्–'शाखां शाखां प्रति प्रतिशाखम्', 'प्रतिशाखायां भवम् प्रातिशाख्यम्'। संहितान्तर्गतप्रतिशाखायां विद्यमानत्वात् प्रातिशाख्यमिति नाम। अत्रापि वर्णानामुच्चारणं, स्वराणां प्रयोगः, सन्धिः, ह्रस्वदीर्घौ, लोपागमे चेत्यादयो विषयाः वर्णिताः। अत्र कतिपयानां प्रातिशाख्यग्रन्थानां नामानि उल्लिख्यन्ते। यथा–ऋग्वेदसंहितान्तर्गतम् ऋग्वेदप्रातिशाख्यम्। कृष्णयजुर्वेदान्तर्गत–तैत्तिरीयसंहितायाः तैत्तिरीयप्रातिशाख्यम्। शुक्लयजुर्वेदान्तर्गतं वाजसनेयीप्रातिशाख्यम्। सामवेदसंहिताया ऋक्तन्त्रम्, सामतन्त्रमक्षरतन्त्रं, पञ्चविधसूत्रं, पुष्पसूत्रमिति च। शौनकीयप्रातिशाख्यं चतुराध्यायिकाप्रातिशाख्यं चेत्यथर्ववेदस्य प्रातिशाख्यग्रन्थद्वयमिति।

**<u>कल्पः–</u>**

वैदिकयागानुष्ठानविषयकं वेदाङ्गं कल्पशास्त्रमिति। आचार्येण जैमिनिना कल्पं प्रयोगशास्त्रमित्युक्तम्। ऋक्प्रातिशाख्यग्रन्थान्तर्गत–वर्गद्वयवृत्तिकारेण विष्णुमित्रेण कल्पस्य लक्षणप्रसङ्गयुक्तं यत्– **"कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम्"**।[17] अर्थाद्वेदविहितानां कर्मणामानुपूर्वेण कल्पना यत्र क्रियते, तत् कल्पवेदाङ्गम्। सायणाचार्योऽपि कल्पशब्दस्य व्युत्पत्तिरूपेणोक्तम्– **"कल्प्यते समर्थ्यते यागप्रयगोऽत्र–इति व्युत्पत्तेः"**।[18] अर्थाद्येन शास्त्रेण वैदिकयागानां कल्पनं समर्थनं च संभवति, तत्कल्पवेदाङ्गमिति। कल्पवेदाङ्गं वेदपुरुषस्य हस्तरूपेण पाणिनिना कल्पितम्– **"हस्तौ**

**कल्पोऽथ पठ्यते"।**[19] हस्तौ विना यथा कर्मसंपादने विपत्तिर्भवति तथा कल्पवेदाङ्गं व्यतिरेकेन वैदिककर्मानुष्ठाने त्रुटिर्जायते। कल्पनाफलप्राप्त्योः प्रथमसाधनं कल्पशास्त्रम्।

कल्पवेदाङ्गं वेदान्तर्गतब्राह्मणस्य क्षुद्रसंस्करणमित्यपि मन्यते। वेदस्य ब्राह्मणभागे विविधाख्यायिकया सह यज्ञानां बृहद्विवरणमस्ति। ब्राह्मणस्थितस्य कर्मकाण्डस्य विवरणबाहुल्यं वर्जयित्वा केवलमत्यावश्यकविधिं विधानं च स्मृतौ संक्षेपेण धारणार्थं कल्पशास्त्रस्योत्पत्तिरिति। कल्पशास्त्रं सूत्राकारे विरचितम्। कल्पसूत्रस्य चत्वारो भेदाः सन्ति, यथा– श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्बसूत्रं चेति।

निम्ने तेषां विवरणं प्रदर्श्यते–

**<u>श्रौतसूत्रम्–</u>**

अत्र श्रौताग्निना सह विहितानां श्रौतयागानां सूत्राकारेण संक्षेपण वर्णनमस्ति। सोमयागः पशुयागः, दर्शपौर्णमासयाग, अग्निहोत्रमित्यादयोऽनेका यागाः श्रौतसूत्रे वर्णिताः। समुपलब्धश्रौतसूत्रेषु प्रधानश्रौतसूत्राणि यथा– ऋग्वेदस्याश्वलायनश्रौतसूत्रम्, शांखायन–श्रौतसूत्रं चेति। सामवेदस्य मशकश्रौतसूत्रम्, लाट्यायनश्रौतसूत्रम्, द्राह्यायन–श्रौतसूत्रम्, जैमिनीयश्रौतसूत्रञ्च। कृष्णयजुर्वेदस्यान्तर्गतेषु श्रौतसूत्रेषु बौधायन–श्रौतसुत्रम्, आपस्तम्बश्रौतसूत्रम्, हिरण्यकेशीश्रौतसूत्रम्, मानवश्रौतसूत्रम्, वैखानसश्रौतसूत्रम्, भारद्वाज–श्रौतसूत्रंच प्रधानानि सन्ति। शुक्लयजुर्वेदस्यान्तर्गतं कात्यायनश्रौतसूत्रं यत् पारस्करश्रौतसूत्रमिति नाम्नापि ज्ञायते। पुनश्च वैतानश्रौतसूत्रमथर्ववेदस्यैकमेव श्रौतसुत्रमिति।

**<u>गृह्यसूत्रम्–</u>**

यस्मिन्कल्पसूत्रे गृह्याग्निना सह विहितानां श्रौतकर्माणां क्रमविन्यासो वर्तते तद्गृह्यसूत्रम्। गृह्यसूत्रेषु गार्हस्थ्यानामवश्यानुष्ठेयानां यागानां गर्भाधानसंकारादारभ्यान्त्येष्टिसंस्कारपर्यन्तं सर्वेषां धार्मिकविधीनां च वर्णनं समुपलभ्यते। तत्र गृह्ययज्ञानां संख्या पितृपार्वणादयः सप्त इति। एतेभ्यः सप्तेभ्यो व्यतिरिक्तानां देवयज्ञ–भूतयज्ञ–पितृयज्ञ–ब्रह्मयज्ञ–मनुष्ययज्ञानां पञ्चानां वर्णनमस्ति। वेदचतुष्टयान्तर्गतानि गृह्यसूत्राणि यथा– ऋग्वेदस्थित–आश्वलायनगृह्यसूत्रं शाङ्खायनग्रुह्यसूत्रंच। सामवेदान्तर्गतानि जैमिनीय–खादिर–

गोभिलगृह्यसूत्राणि। कृष्णयजुर्वेदान्तर्गतेषु विविधेषु गृह्यसूत्रेषु बौधायनगृह्यसूत्रमा–पस्तम्बगृह्यसूत्रं, वाधूलगृह्यसूत्रं, भारद्वाजगृह्यसूत्रं, काठकगृह्यसूत्रं, मानवगृह्यसूत्रं चेत्यादीन्यन्यतमानि। शुक्लयजुर्वेदान्तर्गते पारस्कर–कात्यायनगृह्यसूत्रे। कात्यायनगृह्यसूत्रं वाजसनेयीगृह्यसूत्रमिति नाम्नापि ज्ञायते। पुनश्चाथर्ववेदस्य कौशिकगृह्यसूत्रमिति।

**धर्मसूत्रम्–**

धर्मसूत्रेषु चतुर्वर्णानां कर्तव्याकर्तव्यविषयाः, आश्रमधर्माणां व्यावहारिकानुशासनात्मकपद्धतयः, प्रायश्चित्तविधिः, धर्मानुष्ठानानां सुफलानि च सूत्राकारेण विद्यन्ते। समुपलब्धेषु धर्मसूत्रेषु ऋग्वेदस्य वशिष्ठधर्मसूत्रम्, सामवेदस्य गौतमधर्मसूत्रम्, कृष्णयजुर्दस्य बौधायनधर्मसूत्रमा–पस्तम्बधर्मसूत्रम्, हिरण्यकेशीधर्मसूत्रम्, वैखानसधर्मसूत्रं च शुक्ल–यजुर्वेदस्य विष्णुधर्मसूत्रम्, हारीतधर्मसूत्रम्, शङ्खधर्मसुत्रमथर्ववेदस्य पठिनसी–धर्मसूत्रादीनि प्रधानानि धर्मसूत्राणि इति।

**शुल्बसूत्रम्–**

परिमापक्रियायाः सामान्य–नाम शुल्बम्। अतः माणविषयकं वेदीनिर्माणप्रकारबोधकं शुल्बसूत्रमिति ज्ञाप्यते। भारतवर्षस्य स्थापत्यविद्याया, रेखागणितस्य च ज्ञानाय शुल्बसूत्राणामध्ययनमावश्यकम्। वेदीनिर्माणपद्धतिः वैदिकयज्ञेन सह संबन्धिता। यजुर्वेदानामनेकानां शाखानां शुल्बसूत्राणि समुपलभ्यन्ते, अर्थाच्छुल्बसूत्राणि तु केवलं यजुर्वेदविषयकान्येव। सर्वेषु शुल्बसूत्रेषु वेदीनिर्माणविधिः वैशिष्ट्येन विस्तरेण च वर्णितास्ति। शुक्लयजुर्वेदान्तर्गतं कात्यायनशुल्बसूत्रम्, कृष्णयजुर्वेदान्तर्गतं मानवशुल्बसूत्रम्, वाधूल–शुल्बसूत्रम्, हिरण्यकेशीशुल्बसूत्रम्, आपस्तम्बशुल्बसूत्रम्, बौधायनशुल्बसूत्रम् इत्यादीनि प्रधानानीति।

**व्याकरणवेदाङ्गम्–**

व्याकरण–वेदाङ्गं शब्दव्युत्पत्तिशास्त्रमिति। येन शास्त्रेण पदानां व्युत्पत्तिर्जायते, तद्व्याकरणम्– व्याकृयन्ते व्युत्पाद्यन्ते शब्दा अनेन इति व्याकरणम्। व्याकरणशास्त्रेण प्रकृतिप्रत्ययादिभिः पदानां स्वरूपार्थौ निर्णेयेते। अतो व्याकरणं वेदस्यार्थनिर्णये

परिपूरकमङ्गस्वरूपमिति वा। महाभाष्यकारेण पतञ्जलिना व्याकरणं वेदाङ्गेषु प्रधानमित्युक्तम्– **"प्रधानं च षडङ्गेषु व्याकरणम्"**।[20] पाणिनीयशिक्षायामप्युक्तं यद्व्याकरणं वेदपुरुषस्य मुखस्वरूपम्–**"मुखं व्याकरणं स्मृतम्"।**[21] मुखं विना यथा भोजनादेरभावाच्छरीरधारणं न संभवति तथा व्याकरणं विना वेदपुरुषस्यापि शरीरधारणे प्रतिकूलं जायते। शब्दरूप–धातुरूप–प्रकृतिप्रत्यय–संधि–समासानां ज्ञानं व्यातिरिच्य वैदिकभाषाया ज्ञानं सम्यग् न भवति। तस्माद्व्याकरणमिति वेदाङ्गं वेदार्थज्ञानयावश्यकमिति।

आचार्येण वररुचिना व्याकरणशास्त्रस्य गुरुत्वस्यालोचनावसरे व्याकरणमध्ययनस्य पञ्च प्रयोजनमुक्तम्, महाभाष्यकारेण पतञ्जलिनापि त्रयोदशसंख्यकानीति च। वररुचिनोक्तं पञ्च मुख्यप्रयोजनं यथा– रक्षा, ऊह, आगम, लघु, असन्देहः चेति। उक्तं यत्– **रक्षोहागमलघ्वसन्देहाः प्रयोजनम्**।[22]

रक्षा इत्युक्ते प्रकृति–प्रत्यय–संधि–समासानां सम्यग्ज्ञानं द्योत्यते। ऊह इति नूतनपदस्य कल्पना। प्रयोगानामावश्यकानुसारेण मन्त्रेषु प्रयुक्तानां शब्दानां भिन्नेषु विभक्ति–लिङ्ग–वचनेषु रूपान्तरमूहेति। आगम इत्यनेन व्याकरणाध्ययनस्यावश्यिकनियमा द्योत्यन्ते। लघुशब्दस्यार्थः भाषाविषयकं संक्षिप्तज्ञानमिति। वेदे व्यवहृतयोः शब्दवाक्ययोः सन्देह–निरसनमसन्देह इति।

व्याकरणमतिप्राचीनशास्त्रम्, तथापि प्राचीनशास्त्ररूपेण कोऽपि पूर्णाङ्ग–व्याकरणग्रन्थो न प्राप्यते। पुनश्च विविधेषु संहिता–ब्राह्मण–आरण्यक–उपनिषत्सु कदाचित् व्याकरणस्य पारिभाषिकशब्दानामुल्लेखो दृश्यते। यथा– ऐतरेयब्राह्मणानुसारेण ॐ–कार अ, उ, म् इति त्रयाणां वर्णानां समाहारेण निष्पन्नः। तत्रोक्तं यत्– **"तेभ्योऽभितप्तेभ्यस्त्रयोवर्णा अजायन्ताकार, उकारो म–कार इति तानेकधा समभरत्तदेतदो ॐ इति"**[23]। अपि च तैत्तिरीयोपनिषदि वर्ण–स्वर–मात्रादीनां शब्दानामुल्लेखोऽस्ति। उक्तं यत्**– "वर्णः स्वरः मात्रा बलम्"**[24] इति। एतद्विहाय ई–कार, ऊ–कार, ए–कारः, स्पर्शो, व्यञ्जनोऽन्तःस्थः, सन्धिर्घोष इत्यादयो व्याकरणविषयकाः

पारिभाषिकशब्दा भिन्नेषु प्राचीनग्रन्थेषु विद्यन्ते।

अर्वाचीनकाले प्राप्तेषु व्याकरणशास्त्रविषयेषु ग्रन्थेषु पाणिनिना विरचितोऽष्टाध्यायी इति ग्रन्थः प्राचीनतम इति मन्यते। ग्रन्थेऽस्मिन् वैदिकलौकिकश्चोभयविधयोः संस्कृतभाषयोर्नियमा विशेषरूपेण सन्ति। पाणिनिना तस्य विरचिते ग्रन्थे पूर्ववर्तिनां दशसंख्यकानां वैयाकरणानां नामान्युल्लिखितानीति। ते यथा– आपिशलिः(६.१.९२), स्फोटायनाचार्यः(६.१.१२३), गार्ग्याचार्यः(८.३.२०), शाकल्यमहोदयः(८.३.१९), शाकटायनः–(३.४.१११), गालवः–(६.३.६१), भारद्वाजः–(७.२.६३), काश्यपः–(१.२.२५), चाक्रवर्मणाचार्यः–(६.१.१३०), सेनक(५.४.११२) इत्यादयः। तेषां व्याकरणविषयकग्रन्थाः पुरा प्रचलिता आसन्निति मन्यते, यद्यप्यधुना विलुप्ता इति।

पाणिनिपरवर्तिनिकाले तस्य विरचितमष्टाध्यायीग्रन्थमाश्रित्य तृतीयखिस्टपूर्वाब्दे कात्यायनेन वार्त्तिकग्रन्थो विरचितः, पतञ्जलिना च खिस्टपुर्वे द्वितीयशतके महाभाष्यमिति विरचितम्। अयं ग्रन्थत्रयं व्याकरणशास्त्रस्य स्तम्भस्वरूपम्। पुनश्च संग्रहकार–व्याडिः, वृत्तिकारौ वामन–जयादित्यौ, न्यासकार–जिनेन्द्रबुद्धि इति वैयाकरणानां नामान्यपि प्राप्यन्ते।

## <u>छन्दोवेदाङ्गम्–</u>

छन्दोबद्धा वेदाः। अतः तेषां सम्यगुच्चारणज्ञानाय छन्दोवेदाङ्गस्य ज्ञानमावश्यकमिति। पाणिनीयशिक्षानुसारेण छन्दो वेदपुरुषस्य पादद्वयम्। उक्तं च तत्र– **"छन्दः पादौ तु वेदस्य"**[25] इति। पादद्वयं विना यथा पुरुषः स्थानान्तरं गन्तुं न शक्नोति, तथा छन्दसां ज्ञानं विना वेदस्यार्थज्ञानं पङ्गुरुपेण परिगणितमस्ति। अर्थाद् वैदिकमन्त्राणां शुद्धोच्चारणदृष्ट्या छन्दसां वेदाङ्गता सुस्पष्टमेवास्ति।

यास्काचार्येण छन्दोशब्दस्य व्युत्पत्तिप्रसङ्गेणोक्तम्–**"छन्दांसि छादनात्"**[26] इति। अर्थादाच्छादनात्मकाच्छद्–धातोः(छदि आच्छादने) छन्दोशब्दस्योत्पत्तिः। छादनत्वाच्छन्द इति। तैत्तिरीयसंहितायामुक्तं–

**...ते छन्दोभिरात्मानं छादयित्वोपायन्स्तच्छन्दसां छन्दस्त्वम्।**[27]

अर्थाद्देवाः छन्दोभिरात्मानमावृत्याग्नेः सकाशमगच्छन्। अतः तच्छन्द इति नाम्ना ज्ञायते। निघण्टुग्रन्थानुसारेण छद्–धातुः स्तुत्यर्थकः, पूजार्थकः, प्रसादार्थकश्चेति। यतो हि छन्दोभिर्देवतामुद्दिश्य स्तुतिः क्रियते, तेन ते प्रसन्नं भवन्ति च। अतः छन्द इति नाम।

वैदिकछन्दसां प्रधानवैशिष्टं यथा तान्यक्षरप्रधानानि। वैदिकमन्त्रेषु प्रतिपादे परिमितानामक्षराणां समाहारो दृश्यते। एकैकस्य पादस्य परिमिताक्षरादेवैकैकस्य छन्दसो निष्पत्तिः। कात्यायनेन ऋक्सर्वाणुक्रमण्यां छन्दसो लक्षणप्रसङ्गयुक्तम्– यदक्षरपरिमाणं तच्छन्दः इति।

पञ्चकमेकं सप्तकत्रयं मिलित्वा षड्विंशतिसंख्यकानि छन्दांसि। छन्दसां क्रमेण पूर्वापेक्षादुत्तरवर्तिनोऽक्षराणि संख्याचतुष्टयेण वर्धन्ते। गायत्रीछन्दसः पूर्ववर्तिनः पञ्च छन्दांसि एकत्र पञ्चक इति नाम्ना ज्ञायते। तानि यथा– मा(चत्वार्यक्षराणि), प्रमा(अष्टावक्षराणि), प्रतिमा(द्वादशाक्षराणि), उपमा(षोडशाक्षराणि), समा(विंशतिरक्षराणि) इति। प्रथमसप्त–कान्तर्गतानि छन्दांसि यथा– गायत्री(चतुर्विंशत्यक्षरविशिष्टा), उष्णिक्(२८अक्षराणि), अनुष्टुप्(३२अक्षराणि), बृहती(३६अक्षराणि), पंक्तिः(४०अक्षराणि), त्रिष्टुप्(४४अक्षराणि), जगती(४८अक्षराणि) इति। द्वितीयसप्तकस्य छन्दसां विवरणम्– अतिजगती(५२अक्षराणि), शक्वरीति(५६अक्षराणि), अति–शक्वरी(६०अक्षराणि), अष्टिः(६४अक्षराणि), अत्यष्टिः–(६८अक्षराणि), धृतिः(७२अक्षराणि), अतिधृतिः(७६अक्षराणि) इत्यादीनि।

तृतीयसप्तकान्तर्गतानि छन्दांसि यथा– कृतिः(८०अक्षराणि), प्रकृतिः(८४अक्षराणि), आकृतिः(८८अक्षराणि), विकृतिः(९२अक्षराणि), संस्कृतिः(९६अक्षराणि), अभिकृतिः–(१००अक्षराणि), उत्कृतिः(१०४अक्षराणि) चेद् इत्यादीनि। तथापि गायत्रादीनि प्रथम–सप्तकान्तर्गतानि छन्दांस्येव वेदस्य मूलानि छन्दांसीति मन्यते।

छन्दोशास्त्रेषु पूर्वोक्तछन्दसां लक्षणमक्षरसंख्या, श्रेणीविन्यासः, अक्षरभेदेन नामकरणस्य भिन्नता, वैदिकमन्त्रेषु तेषां प्रयोगश्चेत्यादयो विषया वर्णिताः।

ऋग्वेदप्रातिशाख्यस्यान्तिमे त्रिष्वध्यायेषु वैदिकछन्दसामलोचना दृश्यते। सांख्यायनश्रौतसूत्रऽपि छन्दसामालोचनमस्ति। सामवेदस्य निदानसूत्रे उपनिदानसूत्रे च छन्दसां विवरणमस्ति। तथापि पिङ्गलाचार्येण विरचितं छन्दःसूत्रम् इति ग्रन्थो छन्दसां मुख्यप्रतिनिधिग्रन्थरूपेणाभिधीयते। ग्रन्थोऽयमष्टाध्यायात्मकः। आदावध्यायत्रयं केवलं वैदिकछन्दोविषयकम्। चतुर्थाध्यायतोऽन्तिम–पर्यन्तं वैदिकछन्दसामाश्रये लौकिकछन्दांसि आलोचितानि। तत्र लौकिकमात्रिकछन्दसां जातिरूपेण गायत्र्युष्णिगनुष्टुभादीनि छन्दांस्युल्लिखितानीति।

**ज्योतिषवेदाङ्गम्–**

ज्योतिषवेदाङ्गं वेदस्य षट्ष्वङ्गेष्वन्यतममिति। वैदिकयागेन सह ज्योतिषशास्त्रस्यातिनिविढः संबन्धोऽस्ति। पाणिनिमहोदयेन ज्योतिषं वेदपुरुषस्य चक्षूरूपेण कल्पितमिति, तेनोक्तं यत्– **"ज्योतिषामयनं चक्षुः"**[28] इति। चक्षुर्द्वयं विना यथा निकटस्थितवस्तुनो विचारो न संभवति, तथा ज्योतिषशास्त्रं विना फलदायकं यज्ञानुष्ठानं न भवति। अतो ज्योतिषशास्त्रं वेदस्य नेत्रस्थानीयम्।

यज्ञसंपादनाय समयज्ञानमावश्यकम्। ज्योतिषज्ञानं विना अहोरात्र–पक्ष–मास–ऋतु–संवत्सराणां शुभत्वाशुभत्वज्ञानमपि संभवं नास्ति। तस्मादिदं वक्तुं शक्यते यत्, कालविधानशास्त्रस्य प्रतिनिधिरूपेण ज्योतिषशास्त्रं विरचितम्। यथा दर्शपौर्णमासयागे यथाक्रमेण पौर्णमास इत्युक्ते पूर्णिमातिथौ च दर्श इत्युक्त अमावस्यातिथावनुष्ठानस्य विधानमस्ति। चातुर्मास्ययागे प्रतिचतुर्थे मासे ऋतोरन्ते यज्ञानुष्ठानं कुर्यात्। गवामयनसत्रयागे वत्सरं यावदनुष्ठानं विधेयम्। पुनश्च ऋतुराश्रितान्यनुष्ठानान्यपि विहितानि, यथा– तैत्तिरीयब्राह्मणानुसारेण ब्राह्मणेन वसन्तऋतौ, क्षत्रियेण ग्रीष्मऋतौ, वैश्येन शरदृतौ, च अग्न्याधानं कुर्यादिति विधानं स्यात्। अतो ज्योतिषशास्त्रस्य ज्ञानम् ऋते याज्ञिकविधानमयथार्थं प्रतिभाति। न केवलं यज्ञसंपादनाय, वैदिकमन्त्राणां सम्यगर्थबोधार्थमपि मासवत्सरादेर्ज्ञानमपरिहार्यमिति।

प्राचीनभारतीयज्योतिषविषयकं शास्त्रं 'वेदाङ्गज्योतिषम्' इति। शास्त्रमिदं लगधाचार्येण विरचितम्–

**प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम्।**
**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः।।**[29]

वेदाङ्गज्योतिषमित्यस्य पाठद्वयं विद्यते, तत्रैकं यथा– 'ऋग्वेद–ज्योतिषम् आर्चज्योतिषमिति नाम्नापि ज्ञायते। ग्रन्थेऽस्मिन् षट्त्रिंशत् श्लोकाः सन्ति। अपरं तु यजुर्वेद–ज्योतिषम्, याजुष–ज्योतिषमिति नामान्तरम्। अत्र चतुश्चत्वारिंशत् श्लोकाः विद्यन्ते। अथर्ववेदस्यापि ज्योतिषग्रन्थोऽस्ति, तस्य नाम यथा–अथर्ववेद–ज्योतिषम्(आथर्वन–ज्योतिषम्)। ग्रन्थेऽस्मिन् द्वाविंशत्यधिकं शतं श्लोकाः चतुर्दश प्रकरणानि च विद्येते। ग्रन्थकर्तृरूपेण काश्यपऋषेर्नाम प्राप्यते। याजुष–ज्योतिषस्य द्वौ भाष्यकारौ यथा–शोभाकर–त्रिवेदी, सुधाकर–त्रिवेदी च।

उत्तरकाले ज्योतिषशास्त्रस्य तत्त्वानाश्रित्य बालगङ्गाधर–तिलकः, ज्याकोबिमहोदयः, शंकरबालकृष्ण–दीक्षितमहोदयश्च प्रमुखाः वेदस्य कालनिर्णयं कृतवन्तः।

**<u>निरुक्तवेदाङ्गम्–</u>**

वेदाङ्गेषु निरुक्तमन्यतममिति। पाणिनीयशिक्षाग्रन्थे उक्तं यत्– **"....निरुक्तं श्रोत्रमुच्यते"**[30] इति। अर्थान्निरुक्तं वेदपुरुषस्य कर्णेन्द्रियस्वरूपम्। तस्य कारणरूपेणानुमीयते यत्–शब्दः कर्णेन्द्रियेण ग्राह्यः, निरुक्तमपि शब्दाश्रयी–वेदाङ्गम्। निरुक्ते शब्दानामर्थं प्रति विशेषगुरुत्वं प्रदत्तमपि च शब्दार्थानां संस्कारः श्रोत्राभ्यामेवास्माकं बुद्धिं व्याप्नोति। अतः तेनोक्तं यत्– **"व्याप्तिमत्त्वात्तु शब्दस्य"**[31] इति। न केवलं शब्दोऽर्थस्यापि बुद्धिग्राह्यत्वमस्ति पुनश्च तस्य प्रवेशमार्गः कर्णकुहरेति। अतो निरुक्तं श्रोत्रमित्यनेन सह तुल्यत इति मन्यते।

निरुक्तशब्दस्य सामान्यार्थो यथा– निःशेषेण उक्तम् निरुक्तम्(नि–वच्–धातु+क्तप्रत्यय)। अर्थाद्यत्र मन्त्रान्तर्गतशब्दानामर्थविषयं ज्ञानं निःशेषेणोक्तम् तन्निरुक्तमिति। प्रसङ्गेऽस्मिन् निरुक्तश्लोकवार्त्तिककारेणोक्तम्–**"मन्त्रार्थविषयं ज्ञानं न विनानेन विद्यते"**[32] इति। सायणाचार्येणाप्युक्तं यत्– **"अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्"**[33]।

अर्थाद्यस्मिन् शास्त्रे वैदिकशब्दानामर्थसमूहो निश्चयेन निःशेषेण चोक्तं तच्छास्त्रं निरुक्तमिति।

तत्रोच्यते यत् यास्काचार्येण विरचितं निरुक्ताख्यं वेदाङ्गं निघण्ट्वाख्यस्य ऋग्वेदान्तर्गतवैदिककोषग्रन्थस्य व्याख्यानस्वरूपमिति। निघण्टु इति पञ्चाध्यायात्मको ग्रन्थः। अत्र गो–इत्यारभ्य देवपत्नीपर्यन्तं सप्तत्यधिकं सप्तदशशतं शब्दाः संगृहीताः। ग्रन्थोऽयं त्रिकाण्डेषु विभक्तः। आदौ स्थिताः त्रयोऽध्याया नैघण्टुककाण्डमिति नाम्ना ज्ञायन्ते। अत्र पर्यायवाचकानामेकचत्वारिंशदधिकं शतं संख्यकानां शब्दानां संग्रहोऽस्ति। चतुर्थकाण्डस्य नाम नैगमकाण्डमैकपदिककाण्डं वा। अत्र अष्टसप्तत्यधिकं द्विशतमेकार्थवाचकाः शब्दाः विद्यन्ते। पञ्चमकाण्डं दैवतकाण्डमिति। अत्राप्येकपञ्चाशत्यधिकं शतं देवतावाचकशब्दाः सन्ति। ग्रन्थोऽयं प्राचीनकोषग्रन्थ इति। तमधिकृत्य विरचितस्य यास्काचार्यकृतनिरुक्तग्रन्थस्य परिशिष्टांशं व्यातिरिच्य द्वादशसंख्यका अध्यायाः सन्ति। तत्रापि नैघण्टुक–नैगम–दैवताख्यानि त्रीणि काण्डानि सन्ति। प्रथमाध्यायत्रयं नैघण्टुकम्, चतुर्थतः षष्ठाध्यायपर्यन्तं नैगमकाण्डम्, अन्तिमा षडध्याया दैवतकाण्डमिति नाम्ना ज्ञायन्ते।

**<u>नैघण्टुककाण्डम्–</u>**

निरुक्तकारस्य व्याख्यानुसारेण नैघण्टुककाण्डे पृथिव्यादीनामनेकशब्दानामेकार्थत्वं द्योतितमतो नैघण्टुकमिति नाम– **"एकार्थमनेकशब्दमित्येतदुक्तम्"।**[34] अर्थादेकार्थवाचकादनेक–शब्दत्वान्निघण्टु इति। निरुक्तवृत्तौ दुर्गाचार्येणोक्तम्– **"अनेके शब्दा गवादय एकस्य गवादेरर्थस्य यत्राभिधायिनः कथ्यन्ते तदनेकशब्दं नाम प्रकरणं नैघण्टुकाख्यम्"।**[35] नैघण्टुककाण्डस्य सूचनाकाले यास्काचार्येणोक्तं यत्– **"समाम्नायः समाम्नातः"।**[36] अत्र समाम्नायशब्देन निघण्टु इति शब्दकोषः द्योत्यते। नामानि आख्यातजातानि इति निरुक्तकारस्याभिमतम्। अत्र निगमन–समाहनन–समाहरणानां क्रियाणां विवेचनमस्ति। नामाख्याతनिपातोपसर्गभेदेन पदानि चतुर्विधानि। तेषु नामाख्याते निरपेक्षरूपेणार्थप्रकाशयितुं शक्नुतः, परन्तु उपसर्गः निपातश्चेतरशब्दमाश्रित्यार्थं द्योत्येते। अपि चोक्तं तत्र यद् भावप्रधानमाख्यातम्, नामानि सत्त्वप्रधानानीति। पुनश्च जायते–अस्ति–

विपरिणमते–वर्धते– अपक्षीयते–विनश्यतीति षड्विधा भावविकारा उल्लिखिताः। उपसर्गाणां भिन्नार्थेषु प्रयोगा अपि सन्ति नैघण्टुककाण्डे।

**नैगमकाण्डम्–**

नैगमकाण्डे शब्दस्यैकस्यानेकार्थकत्वं प्रदर्शितमिति। निरुक्तकारेण काण्डमिदमैक–पदिकमित्याख्य या ज्ञापितम्–**"तदैकपदिकमित्याचक्षते"**[37]। अनवगतसंस्काराणां शब्दानां निरुक्तिसाधनमपि दृश्यते– **"अनवगतसंस्कारांश्च निगमनान्"**।[38] अर्थाद्येषां शब्दानां संस्कारोऽनवगतो, व्याकरणस्य नियमानुसारेण न सिद्धः, तेषां दुरूहशब्दानामर्थनिगमनमपि व्याख्यायते। यथा उर्वशी–शब्दोऽनवगतः, शब्दोऽयमप्सराशब्दस्य वाचकः। अप्सराशब्दस्यार्थो यत्– **"अप्सरा अप्सारिणी"**।[39] अर्थादप्सरा अप्सारिणी भवति, अपः प्रति नित्यमेव सरति, तस्य प्रियमुदकं तस्मादप्सरा इति।

**दैवतकाण्डम्–**

नैगमकाण्डे वेदान्तर्गतशाखायां विद्यमानानां गुणवाचकशब्दानां व्याख्या कृता। पुनश्चावशिष्टरूपेण देवस्तुतिवाचकानां पदानामालोचना दैवतकाण्डे कृतम्–**"तद्यानि नामानि प्राधान्य स्तुतीनां देवतानां तद्दैवतम्"**।[40] निरुक्तकारेण तिस्र एव देवताः स्वीकृताः–**"तिस्र एव देवता इति नैरुक्ताः, अग्निः पृथिवीस्थानो वायुर्वेन्द्रोवान्तरिक्षस्थानः सूर्यो द्युस्थानः"**[41] इति। अर्थाद्देवताः त्रिविधाः। अग्निः पृथिवीस्थः, वायुरुतेन्द्रोऽन्तरिक्षस्य देवविशेषः, द्युलोकस्य देवः सूर्य इति। ततो यास्काचार्येण देवतानां स्वरूपमालोचितम्। पुनश्च तेन देवस्तुतिविषयक–मन्त्राणां भेदत्रयं स्वीकृतम्– परोक्षकृतः प्रत्यक्षकृत आध्यात्मिकश्चेति।

तस्मादिदं वक्तुं शक्यते यद् निघण्टु–निरुक्तयोः विषयगतः काण्डगतश्चैक्यमस्ति। निघण्टुः सूत्रमूलकः, निरुक्तग्रन्थश्च व्याख्यानमूलक इति। अतो ग्रन्थद्वयं परस्परं परिपूरकमिति।

**निरुक्तशास्त्रस्य प्रयोजनम्–**

प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति शास्त्रवचनानुसारेण निरुक्तशास्त्रस्यापि प्रयोजनमस्ति। यास्काचार्यस्य मतेन निरुक्तवेदाङ्गस्य विविधा उपयोगिताः सन्ति, ता यथा–

(१) शास्त्रारम्भे यास्कायार्य उक्तवान्– **“समाम्नायः समाम्नातः, स व्याख्यातव्यः”।**[42] अत्र समाम्नाय इत्युक्ते निघण्टुर्द्योत्यते। अर्थान्निघण्टुस्थितानां पदानां व्याख्यान–प्रदर्शनार्थमेव निरुक्तं विरचितम्। अतो निरुक्तं भाष्यमिति। दुर्गाचार्यो निरुक्तं भाष्यमित्युक्तवान्। भिन्टर्नित्समहोदयेनापि(Winternitz) यास्काचार्यः प्रथमभाष्यकार इत्यभिधीयते। तस्माद्वैदिकशब्दानामर्थनिर्णयमेव निरुक्तशास्त्रस्य प्रथमं कार्यमिति।

(२) **“इदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते”**[43]– अर्थान्निरुक्तमन्तरेण मन्त्राणामर्थबोधो न भवति। यतो हि, यास्काचार्येण शब्दानामर्थनिर्णयकाले तेषां प्रयोगप्रदर्शनार्थं वैदिकमन्त्रानुदाहृत्य तेषां व्याख्यापि प्रदर्शितम्। अतो वैदिकमन्त्राणामर्थज्ञानमपि निरुक्तेन संभवति। प्रायेण षट् शतानि मन्त्राणि यास्काचार्येण व्याख्यातानि, यान्यर्वाचीन–अर्थकारान् समीपे सहायकरूपाणि।

(३) **“तदिदं विद्यास्थानं व्याकरणस्य कात्स्न्र्यं स्वार्थसाधकंच”**[44]– इदमित्युक्ते निरुक्तशास्त्रमेकं विद्यास्थानम्(A Branch of Knowledge), ज्ञानलाभस्योपायम् इति। परवर्तिनि समये याज्ञवल्क्यसंहितायां चतुर्दशसंख्यकानि विद्यास्थाना–न्युल्लिखितानि, तेषु निरुक्तमन्यतमम्। उक्तं यत्–

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**
**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।**[45]

शास्त्रमिदं व्याकरणस्य पूर्णताविधानं करोति पुनश्च वेदार्थप्रतिपादनरूपं स्वार्थं साधयति। व्याकरणशास्त्रेण शब्दानां बहिरङ्गस्य व्याख्या कृता, परन्तु निरुक्तेन शब्दानामन्तरङ्गस्य अर्थस्य वानुसन्धानं कृतम्। तस्मिन्काले निरुक्तेन न केवलं व्याकरणमाश्रित्य, चापि शब्दस्य प्रकृत्या सहार्थेन संगतिविधानं कृत्वा सम्यगर्थः प्रदर्शितः। प्रसङ्गेऽस्मिन्नुक्तं यत्– **“न संस्कारमाद्रियेत, विशयवत्यो हि वृत्तयो भवन्ति”।**[46] स्वरसंस्कारयोरालोचनमेव व्याकरणस्य कार्यम्, परन्तु तावर्थज्ञाननिर्भरौ।

पुनश्च निरुक्तेनैवार्थज्ञानं संभवतीति। तस्मादिदं वक्तुं शक्यते यन्निरुक्तं व्यतिरेकेन व्याकरणशास्त्रस्यालोचनं न संभवति। अतो निरुक्तं व्याकरणस्य कार्त्स्नर्म् इति।

(४) वैदिकयागानां सम्यग्रूपेणानुष्ठानार्थमेव निरुक्तस्य ज्ञानमावश्यकम्। निरुक्तशास्त्रेणैव कस्य मन्त्रस्य को देव–इति ज्ञानं जायते, ततो देवाय हविष्प्रदानार्थं विशेषमन्त्रानामुच्चारणं संभवम्। पुनश्च मन्त्रेषु को देवः प्रधानरूपेण स्तुत इति ज्ञानमपि निरुक्तग्रन्थेन लभ्यते। अत इदं वक्तुं शक्यते यन्निरुक्तं कर्मकाण्डस्य तथा मीमांसाया अपि परिपूरकम्।

(५) यास्काचार्य उक्तवान् यत्– **"इदमन्तरेण पदविभागो न विद्यते"**।[47] निरुक्तेनैव पदानां विभागः संभवति। प्रसङ्गेऽस्मिन् दुर्गाचार्येणोक्तम्– **"पदविभागः एवं पदानि वक्तव्यानीत्येतत्पदविभागविज्ञानम्"**।[48] यतो ह्यर्थज्ञानं विना समस्तपदेषु कानि पदानि सन्ति, एतद्ज्ञानं न जायते। यथा 'अवसाय पद्वते'– इति मन्त्रे पद्वदवसमर्थात्पादयुक्तं विचरणशीलम्=गावः, अवसमित्यस्य पर्यायं पथ्योदनम्। जात्यर्थे अवसशब्द एकवचने प्रयुक्तः। गमनार्थकाद् अव्–धातोरुत्तरं अस्–प्रत्यययोगेन अवसशब्दः निष्पन्नः। अतः पदकारेण पदमिदं निरवग्रहमिति। किन्तु 'अवसायाश्वान्'– इति मन्त्रे अवसाय इति पदमव इत्युपसर्गपूर्वकात्सो–धातोर्ल्यप्–प्रत्यययोगे निष्पन्नम्। अवपूर्वक–सोधातोरर्थो विमुक्तकरणमिति। अत्र अवसाय इति पदमव+साय इति पदयोः समवायेनोत्पन्नम्। तस्मात् पदपाठकारेण अवऽसाय इति रूपेण पदपाठः क्रियते। येन पदस्यार्थज्ञानं नास्ति, तेनेदं विभाजनं न संभवम्। पदस्यार्थबोधो निरुक्तादेव जायते। अतो निरुक्तं विना पदविभागोऽसंभव इति।

(६) अर्थज्ञानस्य माहात्म्यमस्ति। ज्ञानस्य प्रशंसाज्ञानस्य निन्दा च भवति सर्वत्र। वेदो ज्ञानानामकरस्वरूपः। तस्माद्वेदार्थज्ञानमावश्यकमिति। पुनश्च वेदार्थबोधो निरुक्तं विना न संभवति। अतोऽज्ञानात्परित्राणार्थं ज्ञानहेतुप्रशंसाप्राप्त्यर्थंच निरुक्तशास्त्रस्याध्ययनं प्रयोजनमिति।

(७) आधुनिकभाषाविज्ञानेऽपि निरुक्तस्योपयोगिता वर्तते। भाषाविज्ञानस्यैका शाखा–अर्थविज्ञानम्(Semantics)। यस्योत्पत्तिः १८९८खिस्टाब्दे ब्रील्–महोदयस्य विरचितेन एसे द सिमेन्तिक् इति ग्रन्थेन इति मन्यते। किन्तु यास्काचार्येण खिस्टपूर्वाब्दे षष्ठशतके अस्योल्लेः कृतः। यास्काचार्येण निरुक्ते अर्थपरिवर्तनविषय आलोचितः। इदं मन्यते यत् यास्काचार्यकृतं निरुक्तमर्थविज्ञानस्यातीव प्राचीन–भारतीयग्रन्थ इति।

तस्मान्निरुक्तस्य एतान् प्रयोजनान् गृहीत्वा वेदाङ्गेषु स्थानं दीयते।

*******

**आकरनिर्देशः**

---

[1] सि.कौ. २, पृ. २५५।

[2] पा.शि. ४२–४३, पृ.१९–२०।

[3] मु.उ. १/१/५, पृ. ६।

[4] षड्.ब्रा. ४/७/१/२।

[5] गु.मु.(संपा.),ऋ.भा., पृ. १४५।

[6] तै.उ.१/२, पृ.२५७।

[7] पा.शि. ३, पृ. १३।

[8] पा.शि. ११, पृ. १४।

[9] गु.मु.(संपा.), ऋ.भा.,पृ. १४६।

[10] तत्रैव।

[11] पा.शि. ११, पृ.१४।

[12] गु.मु.(संपा.), ऋ.भा., पृ. १४७।

[13] पा.शि. १३, पृ. १४।

[14] पा.शि. ३४, पृ. १८।

[15] ठाकुरः (संपा.), नि. १/६, पृ. १६०।

[16] पा.शि.५४, पृ. २२।

[17] ऋ.प्रा., पृ. १७।

[18] गु.मु.(संपा.), ऋ.भा., पृ. १४९।

[19] पा.शि. ४२, पृ. १९।

[20] म.भा. १/१/१, पृ. ३।

[21] पा.शि. ४३, पृ. २०।

[22] म.भा. १/१/१, पृ. ३।

[23] ऐ.ब्रा. ५/३२।

[24] तै.उ. १/२, पृ. २५७।

[25] पा.शि. ४२, पृ. २०।

[26] ठाकुरः (संपा.), नि. ७/१२/२, पृ. ८७३।

[27] तै.सं. ५/६/६/१, पृ. २३७६।

[28] पा.शि. ४२, पृ. २०।

[29] आ.ज्यो. २।

[30] पा.शि. ४२, पृ.२०।

[31] ठाकुरः (संपा.), नि. १/२/४, पृ. १६।

[32] नि.श्लो.वा. १/१/३, पृ. २।

[33] गु.मु.(संपा.), ऋ.भा., पृ. १६७।

[34] ठाकुरः (संपा.), नि. ४/१/१, पृ. ४५७।

[35] मु.श. (संपा.), नि. ४/१, पृ. १५८।

[36] तदेव १/१, पृ. १।

[37] ठाकुरः (संपा.), नि. ४/१/४, पृ.४५८।

[38] तदेव ४/१/३, पृ. ४५७।

[39] तदेव ५/१३/२, पृ. ६३७।

[40] तदेव ७/१/२, पृ. ८२५।

[41] तदेव ७/५/१, पृ.८४६।

[42] तदेव १/१/१/१, पृ.१।

[43] तदेव १/३/४/१, पृ. १४०।

[44] तदेव १/३/४/३, पृ. १४१।

[45] ऊ.सं. ४/१/३, पृ. १४०

[46] ठाकुरः (संपा.), नि. २/१/१/४–५, पृ. १८४–१८५।

[47] मु.श. (संपा.), नि. १/६, पृ. ४४।

[48] तत्रैव।

# तृतीयोऽध्यायः

## निरुक्तग्रन्थे जीवविद्यायाः तत्त्वानि

वैदिकसाहित्यम् भारतवर्षस्य प्राचीनतमं साहित्यम्। श्रुतिपरंपरायां वैदिकमन्त्राणां शुद्धिरक्षार्थं मन्त्राणां सम्यग्बोधाय वैदिकयज्ञक्रियायाः यथार्थरूपेण स्थापनार्थं च वेदाङ्गषट्कं रचितमासीत्। तानि वेदाङ्गानि यथा– शिक्षा, कल्पः, व्याकरणम्, निरूक्तम्, छन्दः, ज्योतिषं चेति। तेषु वैदिकमन्त्रान्तर्गतपदानामर्थबोधाय प्रधानतमं शास्त्रं यास्काचार्येण विरचितं निरुक्तमिति। शास्त्रमिदं निघण्टु–शब्दकोषस्य व्याख्यानस्वरूपम्। निरुक्तशास्त्रे पदसमूहः अर्थावबोधाय निरपेक्षरूपेण विद्यते। परिशिष्टांशं व्यतिरिच्य द्वादशाध्यायात्मकं निरुक्तम् काण्डत्रयेषु विभक्तम्। तानि यथा– नैघण्टुककाण्डम्, नैगमकाण्डम्, दैवतकाण्डम् च । प्रसङ्गेऽस्मिन् अणुक्रमणिकाभाष्ये उक्तम् –

**आद्यं नैघुण्टुकं काण्डं द्वितीयं नैगमं तथा ।**

**तृतीयं दैवतश्चेति समाम्नायस्त्रिधा स्थितः।।**[1]

अपि च उक्तम् –

**गौराद्यापारपर्यन्तमाद्यं नैघण्टुकं मतम् ।**

**जहाद्युल्वमृबीसान्तं नैगमं संप्रचक्षते ।।**

**अग्न्यादिदेवपत्न्यन्तं देवताकाण्डमुच्यते ।**[2]

अर्थात् 'गौः' इत्यारभ्य 'अपारः'–पर्यन्तं नैघण्टुककाण्डम् । जहादिभ्य उल्वमृबीसापर्यन्तं नैगमकाण्डम् । अग्नादिभ्यः देवपत्न्यन्तं दैवतकाण्डमिति ।

नैघण्टुककाण्डे निरुक्त–व्याकरणयोः संबन्धेन सह पर्यायवाचकानां पदानां निर्वचनं दृश्यते । नैगमकाण्डे वैदिकपदानां व्युत्पत्तिः सार्थं व्याख्यानं च दृश्येते । पुनश्च दैवतकाण्डे वैदिकदेवताविषयकानि तत्त्वानि दृश्यन्ते ।

निरुक्तकारेण वैदिकमन्त्राणां व्याख्यानवसरे तदन्तर्गतपदानां निर्वचनं प्रदर्शितम् । अर्थपरिवर्तनं न कृत्वा पदस्य निर्वचनप्रदर्शनमासीत् तस्याभिप्रायः । दुरूहपदानां

व्युत्पत्तिनिर्णयावसरे तेन क्वचित् वर्णागम–वर्णलोप–विभक्ति–विपरिणामानामाश्रयग्रहणं कृतम् ।

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे विविधवैदिकपदानां निर्वचनप्रदर्शनावसरे विविधशास्त्राणां विविधानि तत्त्वानि उल्लिखितानि । तेषु अन्यतम आसीत् जीवशास्त्रस्य तत्त्वसमूहः ।

विज्ञानस्य यस्यां शाखायां जीवनस्य रीतिप्रक्रियावैचित्र्याणामध्ययनं विद्यते, सा शाखा जीवविद्या इति नाम्ना ज्ञायते । अत्र उद्भित्प्राणिनामपि च विविधानां आणुवीक्षणिकजीवानामालोचना समासेन विद्यमाना । जीवविद्यायाः प्रधानरूपेण तिस्रः शाखाः विद्यन्ते । ता यथा – १. उद्भिद्विद्या –अत्र तु विषयो भवति उद्भिदामालोचना ।

२. प्राणिविद्या – अस्यां विद्यायां तु प्राणिनामालोचना दृश्यते ।

३. कीटविज्ञानम् उत अनुजीवविद्या – अत्र त्वाणुवीक्षनिकानां जीवानामालोचना विद्यते।

एताः शाखाः विहाय अन्याः विविधाः शाखाः राजन्ते । तेषु काश्चित् यथा – शारीरविद्या, कलाविद्या, वंशगतिविद्या, सुप्रजननविद्या इत्यादयोऽन्यतमाः।

**उद्भिद्विद्याविषयकानि तत्त्वानि–**

यास्काचार्येण तस्य कृते निरुक्तग्रन्थे उद्भिद्देहाङ्गवाचकस्य विविधपदस्य निर्वचनं कृतम्, यानि उद्भिद्विद्याविषयकानि तत्त्वानीति। **यथा वृक्षः–**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे वृक्षशब्दस्य निर्वचनप्रसङ्गेणोक्तम् –

**वृक्षो व्रश्चनाद् वृत्वा क्षां तिष्ठतीति वा।**[3]

अर्थाद् वृक्ष–शब्दः व्रश्च्–धातुनिष्पन्नः उत यः भूमिं छादयित्वा तिष्ठतीति।

अत्र दृश्यते यत्, यास्काचार्येण वृक्षशब्दस्य निर्वचनद्वयं कृतम्। प्रथमनिर्वचनानुसारेण छेदनार्थकात् व्रश्च्–धातोः वृक्षशब्दस्योत्पत्तिः; काष्ठसंग्रहार्थं मनुष्यः वृक्षश्छेदनं करोति।

द्वितीयनिर्वचनानुसारेण आवरणार्थक–वृ–धातुः क्षा–शब्दश्चेतदुभयसंयोगेन वृक्षशब्दस्य निष्पत्तिः। तत्रार्थो जायते–यः क्षां अर्थाद् भूमिमावृत्य तिष्ठति।

यास्काचार्यकृतवृक्षशब्दस्य निर्वचनद्वयमाधुनिकविज्ञानभावनायाः बीजस्वरूपम्। यतो हि उद्भिद्विद्यानुसारेण वृक्षशब्देन उच्चैः, काष्ठमयं, स्तम्भाकृतिकाण्डविशिष्टं च उद्भिद्विशेषं द्योत्यते। विविधव्यवहारोपयोगित्वाद् वृक्षस्य काष्ठश्छेदनं भवति। अपि च वृक्षः मूलशाखाभ्यां मृत्तिकां वृत्वा तिष्ठतीति।

**<u>पुष्पम्–</u>**

यास्काचार्येण पुष्पशब्दस्य निर्वचनप्रसङ्गेणोक्तम्–

**पुष्पं पुष्पतेः।**[4]

अर्थात् पुष्–धातोः पुष्पशब्दस्य निष्पत्तिः। विकसनार्थपुष्–धातुनिष्पन्नं पुष्पमिति। यतः विकसितं भवति अतः पुष्पमिति।

निर्वचनमिदमाधुनिकविज्ञानभावनायाः भित्तिस्वरूपमिति बोद्ध्यते। यतो हि, उद्भिद्विद्यानुसारेण पुष्पमङ्गसंस्थानगतदृष्ट्या उद्भिदां सुन्दरतममङ्गम्। विविधगन्धविशिष्टं वर्णविशिष्टं च भवति पुष्पम्। सपुष्पकौद्भिदां विटपाकृतेः परिवर्तनेन पुष्पमुकुलस्योत्पत्तिः संभवतीति। पुनरपि विकसितं मुकुलं पुष्पमिति। अतः पुष्पस्य विकसनं भवतीति। फलबीजे पुष्पादेव जायेते।

**<u>मूलम्–</u>**

उद्भिद्देहाङ्गवाचकमूलशब्दस्य निर्वचनप्रसङ्गेणोक्तमाचार्येण यास्काचार्येण–

**मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा।**[5]

अर्थाद् मूलशब्दस्योत्पत्तिः 'मुच्'–धातोः उत 'मुष्'–धातोः उत 'मुह्'–धातोः इति।

तस्य नये– 'मुच्'–धातोः मूलशब्दस्य निष्पत्तिः भवितुमर्हति, यतो हि मूलादङ्कुरादयो मुक्ताः भवन्ति। वृत्तिकारेण स्कन्दस्वामिणोक्तम् – **"मोचनादङ्कुरादीनाम्"।**[6] 'मुष्'–

धातोः निष्पन्नं मूलमिति; भूनिम्नस्थत्वाद् मुषितवस्तुना सह तुल्यते। प्रसङ्गेऽस्मिन् स्कन्दस्वामिनोक्तम्–**"मुषितमिव वा तद्वृत्तितयान्तर्हिततत्वात्।** [7] उत 'मुह्'–धातुनिष्पन्नः मूलशब्दः; मोहितं करोति अर्थाद् भूमेः अधोऽन्तर्हिततत्वान्मूलस्य गतिप्रकृती मनुष्यैः न ज्ञायेते। वृत्तिकारस्कन्दस्वामिनः उक्तिः यथा– **"न ज्ञायते कियदधोगतं कियत्तिर्य्यग्गतमिति"।**[8]

निर्वचनादस्माद् मूलविषयकं वैज्ञानिकतत्त्वं ज्ञायते यदुद्भिदां भ्रूणाक्षस्थाद् भ्रूणमूलाद् मूलस्योत्पत्तिरिति। भ्रूणमूलात् सृष्टः योऽंशः सूर्यालोकस्य प्रतिकूलमपि च अभिकर्षस्यानुकूलं गत्वा मृत्तिकाया अधः प्रविशति सः मूलनाम्ना ज्ञायते। भूनिम्नस्थस्य प्रधानमूलस्य स्थानिकमूलस्य वा विस्तारकर्मविषये किमपि ज्ञानं न जायत इति।

**<u>व्रततिः</u>–**

यास्काचार्येण तस्य विरचितस्य निरुक्तग्रन्थस्य नैगमकाण्डे व्रततिशब्दस्य व्युत्पत्तिप्रदर्शनावसरे कथितं यत्–

**व्रततिर्वरणाच्च सयनाच्च तननाच्च।**[9]

अस्य निर्वचनस्यार्थो यद्व्रततिशब्दः आच्छादनार्थकाद् 'वृ'–धातोः, बन्धनार्थकात् 'सि'–धातोः, विस्तारार्थकात् 'तन्'–धातोश्च निष्पन्नः। अतो दृश्यते यत् त्रिधातुजः व्रततिशब्दः। वृ–सि–तन्नादीनां धातूनां योगेन व्रततिशब्दस्योत्पत्तिः। अतो व्रततिराच्छादयति, वृक्षादीनां बन्धनं करोति विस्तीर्णं भवति च।

यास्ककृतनिर्वचनस्यानुवृत्तिरर्वाचीनमुद्भिद्विद्यायामपि दृश्यते। तत्रोक्तम्– व्रततिः लतानो वा(creeper) दुर्बलकाण्डयुक्तोऽर्धवायवीय उद्भिद्विशेषः। बृद्धिरेषामुद्भिदां भूमौ शायितावस्थायां वृक्षादीनामवलम्बनं कृत्वा च भवति। एषां काण्डान्तर्गतपर्बादस्थानिकं मूलमुत्पद्यते। तत्रोदाहरणरूपेण कुशः, मिष्ट–आलुक इति चोक्तम्।

**<u>शाखा–</u>**

निरुक्तकारेण यास्काचार्येण वृक्षशाखावाचकस्य शाखाशब्दस्य व्युत्पत्तिनिर्णयावसरे उक्तम्–

**"शाखाः खशयाः शक्नोतेर्वा"।**[10]

अर्थाद्वृक्षशाखासमूहः खशयः आकाशस्थितः उत 'शक्'-धातोः शाखाशब्दस्योत्पत्तिः।

अतः शाखाशब्दस्य व्युत्पत्तिद्वयं तेनोल्लिखितम्। प्रथमानुसारेण – खशयशब्दः शाखाशब्दवाच्यः। खशयशब्दस्यार्थः खे अर्थात् व्योम्नि शयनं करोति यः(ख+शी+अच्)। वृत्तिकारस्कन्दस्वामिना वृक्षशाखायाः खशयत्वप्रसङ्गेणोक्तम्– **"शाखा वृक्षस्य स्कन्धतो जनित्वा खे आकाशे शेरते व्यवतिष्ठन्ते"।** [11] । द्वितीयनिर्वचनानुसारेण 'शक्'-धातोः शाखाशब्दस्योत्पत्तिः। 'शक्नोतेः' इति तिङन्तपदान्तर्गतशक्- धातोरर्थः 'समर्थं भवति'। कर्तृवाच्ये शक्धातोरुत्तरमौणादिक –'ण'–प्रत्यययोगेण शाकशब्दस्योत्पत्तिः। समर्थत्वात् शाखायाः शाखात्वमिति। प्रसङ्गेऽस्मिन् स्कन्दस्वामिना कथितम्– **"शक्नुवन्ति च पक्षिणं स्वं च पुष्पफलं धारयितुम्"।**[12] इति।

शाखाशब्देन वृक्षस्य प्रधानकाण्डादुत्पन्नानां विविधशाखानां समूहः द्योत्यते। यद्यपि अधिकसंख्यकाः शाखाः उल्लम्बरूपेणोर्ध्वगतवत्यः भवन्ति तथाप्यनुभूमिकशाखापि दृश्यते। वृक्षशाखायामेव पुष्पफले जायेते। विहगानां निवासरूपेणापि वृक्षशाखाः व्यवह्रियन्ते। अतः शाखाशब्दस्य निर्वचनेऽपि वैज्ञानिकभावनाया बीजं निहितम्।

**<u>कण्टकम्–</u>**

यास्काचार्यकृतकण्टकपदस्य निर्वचनं यथा–

**कण्टकः कंतपो वा कृन्ततेर्वा कण्टतेर्वा स्याद्गतिकर्मणः उद्गततमो भवति।**[13]

अतः कण्टकपदस्य निर्वचनत्रयं ज्ञापितम्। प्रथमानुसारेण ज्ञायते यत्– कं–पदम्+तप्– धातोः कण्टकपदस्योत्पत्तिरर्थात् कंतपशब्दः कण्टक इति शब्दे रूपान्तरितो भवति। तस्मात् संतापप्रदानार्थमेव वृक्षात् कण्टकमुत्पद्यते। द्वितीयनिर्वचनानुसारेण छेदनार्थकात् 'कृन्त्'– धातोः कन्टकपदं निष्पन्नम्, कृन्तकम् इति पदात् कण्टकम् इति पदम् जायते, अर्थात् कण्टकेभ्यः हस्तपदादयः छिन्नं बिद्धं वा भवन्ति। तृतीयनिर्वचनानुसारेण गत्यर्थकात् कण्ट्– धातोः कण्टकस्योत्पत्तिः; वृक्षाद्विशेषरूपेण कण्टकमुत्पद्यते।

निर्वचनमिदं यथार्थरूपेण विज्ञानसम्मतम्, यतः कण्टकानि विशेषोद्देश्येनैव विशेषरूपेण वृक्षादुत्पद्यन्ते। कण्टकसमूहः उद्भिदां विविधाङ्गस्य रूपान्तरितोऽङ्गस्वरूपः। उद्भिदामुपपत्राणां परिवर्तितं रूपं पत्रकण्टकमिति(Spine), उदाहरणं यथा–फणिमनसा। काक्षिकमुकुलादुत्पन्नं काण्डकण्टकम्(Thorn), यथा–बिल्बवृक्षः। उद्भिदां देहत्वकादुत्पन्नं कण्टकम् गात्रकण्टकमिति(Prickle) , गोलापवृक्षे गात्रकण्टकं दृश्यते। तृणभोक्तृप्राणिभ्योऽपि चान्येभ्यः प्राणिभ्य आत्मरक्षार्थं वृक्षात् विशेषरूपेण कण्टकानामुत्पत्तिः भवतीति।

**<u>प्राणिविद्याविषयकानि तत्त्वानि–</u>**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे विविधानां प्राणिवाचकानां शब्दानामपि निर्वचनं कृतम्। निर्वचनेषु प्राणिनां विविधानि वैशिष्टान्युल्लिखितानि, यानि प्राणिविद्याया(Zoology) आलोचितानि तत्त्वानीति। यथा–

**<u>सिंहशब्दः–</u>**

सिंहशब्दस्य निर्वचनप्रसङ्गेणोक्तं यास्काचार्येण–

**सिंह सहनाद्धिंसेर्वा स्याद् विपरीतस्य सं–पूर्वस्य वा हन्तेः संहाय हन्तीति वा।**[14]

अर्थात् सिंहशब्दः ‘सह्’–धातोर्निष्पन्नोऽथवा विपर्यस्तवर्णस्य ‘हिंस्’–धातोर्निष्पन्न अथवा सं–पूवकस्य ‘हन्’–धातोर्निष्पन्नस्य सिंहशब्दस्योत्पत्तिः, स्वं संकोचनं कृत्वा हिनस्तीति सिंहशब्दस्य व्युत्पत्तिः।

अभिभवार्थकात् ‘सह्’’–धातोर्निष्पन्नस्य सिंहशब्दस्य व्युत्पत्तिः भवति–योऽन्यं प्राणिनमभिभूय तिष्ठति। द्वितीयनिर्वचनानुसारे ‘हिंस्’–धातोर्वर्णविपर्ययात् सिंहशब्दस्योत्पत्तिरर्थात् सिंहो हिंसां करोति। पुनः परवर्तिनिर्वचनानुसारेण सिंहशब्दस्य व्युत्पत्तिर्भवति प्रथमे स्वं संकोचयति, परश्चात्मप्रकाशं करोति मृगादीनां हननाय।

निर्वचनमिदं तु विज्ञानसंमतम्। यतो हि सिंहो हिंस्रः स्तन्यपायी मांसाशी–प्राणीति। सिंहस्य वैशिष्टमस्ति–एते सर्वदा गोष्ठीरूपेणैव तिष्ठन्ति। यदा शिकारं कुर्वन्ति तदापि दलबद्धरूपेणैव

गच्छन्ति। शिकारं तु सर्वाभिर्दिग्भिरावृत्यान्तराले तिष्ठन्ति, यदैवावसरं प्राप्नुवन्ति तदैवाक्रमणं कृत्वा हननं कुर्वन्ति।

**व्याघ्रः–**

यास्काचार्यः व्याघ्रशब्दस्य निर्वचनप्रसङ्गे कथितवान्–

**व्याघ्रो व्याघ्राणाद्व्यादाय हन्तीति वा।**[15]

एतेन वक्तुं शक्यते यत्–व्याघ्रशब्दः वि,आ इत्युपसर्गद्वयपूर्वकाद घ्रा इति धातोर्निष्पन्नः। विशेषरूपेण गन्धग्रहणत्वाद् व्याघ्र इति नाम। व्याघ्रो विशेषरूपेणाघ्राणं करोति, अर्थाद् व्याघ्रस्य घ्राणशक्तिः तीक्ष्णः, गन्धं प्राप्य व्याघ्रः शिकारस्यानुधावनं करोति। अथवा वि,आ चेत्युपसर्गद्वयपूर्वकाद् हन्–धातोः व्याघ्रशब्दस्योत्पत्तिः। अस्य निर्वचनानुसारेणार्थो भवति यो मुखव्यादानपूर्वकमथाद् विवृतं कृत्वोत विविधरूपेणाकर्षणपूर्वकं हननं करोति स एव व्याघ्र इति। प्रसङ्गेऽस्मिन् वृत्तिकारस्य स्कन्दस्वामिन उक्तिर्यत्–**"विवृत्यास्यं विविधं वादायाकृष्य हन्तीति"**।[16]

यास्ककृते द्वितीयनिर्वचने वैज्ञानिकचिन्ताया बीजं दृश्यते, तद्यथा– प्राणिविद्यायाः तत्वानुसारेण व्याघ्रः स्तन्यपायि–मांसाशि–प्राणिविशेषः। व्याघ्रः खाद्यरूपेण विविधं प्राणिनं स्वीकरोति, यथा–हग्–डियर्(Hog Deer) नील्गाइ, वन्यशूकर इत्यादयः। एके पुनर्मनुष्यमपि शिकाररूपेण गृह्णन्ति। आस्यमेव शिकाराय प्रधानरूपेण व्यवहरति, कदाचिदग्रपादमपि। आदौ प्राणिनः ग्रीवादेशो मुखेनाघातं कृत्वा सुषुम्नाकाण्डस्य भञ्जनं करोति। यदि शिकार आकारे महान् भवति तर्हि तस्य ग्रीवादेशे आघातं कृत्वाग्रपादाभ्यां शिकारं स्थिरीकरोतीति।

**शकुनिशब्दः–**

निरुक्ते शकुनिशब्दस्य व्युत्पत्तिप्रसङ्गे निर्वचनमेव प्रदर्शितं यास्केन। तेनोक्तम्–

**शकुनिः शक्नोत्युन्नेतुमात्मानं शक्नोति नदितुमिति वा शक्नोति तकितुमिति वा सर्वतः शंकरोऽस्त्विति वा शक्नोतेर्वा।**[17]

‘शकुनिः शक्नोति उन्नेतुम् आत्मानम्’ अर्थात् शकुनिरात्मानमुपरि नेतुं ऊर्ध्वमुत्थापयितुं समर्थः। ‘शक्’–धातुस्तथा उत्पूर्वकनीधातुश्च मिलित्वा शकुनिशब्दं निष्पादयति। तस्यार्थो य आत्मानमुपरि नेतुं समर्थः। ‘शक्नोति नदितुमिति वा’ इतीयं व्युत्पत्तिमादाय एवमुच्यते शकुनिर्गर्जितुं समर्थः। तदा शग्धातुस्तथा नद्धातुश्च मिलित्वा शकुनिशब्दो निष्पन्नः। ‘शक्नोति तकितुम्’– इति व्युत्पत्तिमादाय अस्यार्थ एवं व्याख्यायते यत्–योऽन्तरिक्षे विचरितुं गन्तुं शक्तः सः शकुनिः। गमनार्थक–तग्धातु–शग्धातुभ्यां शकुनिशब्दः निष्पन्नः। ‘सर्वतः शङ्करोऽस्तु इति वा’– इत्यनेन निर्वचनेन इदमवगम्यते यत् शकुनिपक्षी अस्माकं कृते सुखकरः मङ्गलप्रदश्च भूयादिति। सुखार्थक–‘शम्’–धातु–कृधातुभ्यामयं शब्दो निष्पन्नः। अथवा ‘शक्नोतेर्वा’ इति निर्वचनमाधारेण शकुनिशब्दः केवलशक्–धातोर्निष्पन्नः, अस्यार्थः शकुनिः शक्तिसंपन्नः।

शकुनिशब्दस्य यास्काचार्यकृतमिदं निर्वचनमपि वैज्ञानिकचिन्तनस्योदाहरणमेकम्। शकुनिपक्षी(Vulture) एको गुरुकायो हिंस्रपक्षी(Bird of Prey), यः स्वभावतो मृतप्राणिनां गलितदेहावशेषं भुक्त्वा जीवति। प्रायेण त्रयोविंशतिप्रजातयः शकुनिपक्षिणो दृश्यन्ते, येषां स्वाभाविकवैशिष्ट्यं त्विदं यदेते सर्वे एव धरणितलाददतिदूरमुड्डीयाकाशे वर्तुलकारेण विचरन्ति। एतेषां पक्षाण्यपि विहगान्तरापेक्षया दीर्घाणि भवन्ति। उड्डयनकाले ते वायोर्क्रमवर्धमानां गतिमाश्रित्यात्मानमत्युच्चस्थाने स्थापयितुं समर्थाः। तेषां कूजनमपि परस्पराद् भिन्नरूपं स्यात् । यथा केचन कृष्णवर्णीयपक्षिणः(Black Vulture) भोजनकाले परस्परसंग्रामकाले वा घोत्–घोत् इति तथा हिस्–हिसिति विशिष्टं रवं कुर्वन्ति। दूरस्थजनानां कृते कदाचित्तेषां रवः क्षुधितशूकर इव प्रतिभाति। अन्यच्च तुरस्कदेशीयशकुनः(Turkey Vulture) स्मितरवेण रौति। किन्तु स यदा क्रुद्धो भवति लुब्धवस्तुलाभाय यतते वा तदा कर्कशकण्ठेण हिस्–हिसिति रवं करोति। किंच उड्डयनकाले अनुनासिकस्वरेणेषद्घ्यान्घ्यानिति शब्दं करोति। अस्माकं बहूनुपकारानपि ते साधयन्ति। तेषां भोज्यं भवति मृतजन्तूनां गलितमांसम्। मृतमनुष्याणां मांसमपि खादन्ति। एवं प्रकारेण तस्थान् कीटानपि ते नाशयन्ति। तैर्जलातङ्क(Rabies), पृष्ठव्रण(Anthrax) इत्यादिरोगानां विस्तृतिरपि प्रतिरुध्यते। बहुबलविशिष्टत्वात्ते वायोर्भिन्नगत्यामपि

स्वपक्षद्वयमक्षतं स्थापयोड्डयनं कुर्वन्ति। किंच क्षणाभ्यन्तर एव ते गोसदृशानां जन्तूनां मृतदेहं खण्डशो विभाजयन्ति। एकेनैव निमेषेण शकुनिनैककिलोपरिमितं मांसं भक्ष्यते।

**<u>अश्वः–</u>**

अश्व–शब्दस्य निर्वचनप्रसङ्गे यास्काचार्य उक्तवान्–

**अश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा।**[18]

निर्वचनस्यार्थो यथा–अश्व इत्यभिधानं कुतः आगतम्। अध्वानं व्याप्य तिष्ठत्यधिकं भोजनं करोति–इत्यतोऽश्वस्येदमभिधानम्।

अत्र दृश्यते यत् निर्वचनद्वयं तेनोक्तम्। प्रथमनिर्वचनानुसारेण व्याप्तार्थक–'अश्' इति धातोः 'क्वन्'–प्रत्यययोगेनाश्वशब्दो निष्पन्नः। अश्वोऽध्वानं व्याप्नोत्यर्थाद् वेगेन धावति। द्वितीयनिर्वचनानुसारेण भोजनार्थक–'अश्'–धातोरुत्तरं 'क्वन्'–प्रत्यये कृते अश्वशब्दो निष्पन्नः। तेनाश्वोऽधिकं खादतीत्यर्थो जायते।

अश्वशब्दस्य प्रथमनिर्वचनं वैज्ञानिकभावनाया आधारस्वरूपमिति। तेषां मतानुसारेणाश्वस्य विशेषवैशिष्टमेकं हि–अश्वा जवेन धावितुं समर्थाः। तेषां चरणानामधोभागे प्रायोऽधिकांशमाश्रित्य किंचिदपि मांसपिण्डं न वर्तते। केवलं कण्डुरा(Tendons) तथा लिगामेण्टेव वर्तेते। एतौ तं वेगेन धावितुं सहायतां कुरुतः। प्रतिहोरमेते प्रायोऽष्टचत्वारिंशत्किलोमिटर्–परिमितवेगेन धावितुं समर्थाः। किंच(Guiness Book Of Records) इत्येतेषां तथ्यानुसारेणेदं ज्ञायते यदष्टोत्तरद्विसहस्रतमे संवत्सरे ग्र्याण्ट्भिल्ले नामके नगरेऽनुष्ठिते(Penn National Race Course) इत्याख्येऽनुष्ठान एकस्याश्वस्य वेग आसीत् प्रतिहोरं सप्ततिकिलोमिटर् इति। अयं च द्रुततमाश्वत्वेन परिगणितम्।

**<u>श्वा–</u>**

निरुक्तकारेण यास्काचार्येण सुनकवाचकस्य श्वाशब्दस्य निर्वचनं कृतम्। तेनोक्तं यत्–

**श्वा शुयायी शवतेर्वा स्याद् गतिकर्मणः श्वसितेर्वा।**[19]

श्वा अर्थात् सुनकः क्षिप्रगामी अथवा गत्यर्थकात् 'शव्'–धातोः श्वन्शब्दस्य निष्पत्तिः। 'श्वस्'–धातोर्वा श्वन्शब्दस्योत्पत्तिः।

द्रष्टुं शक्यते यत् श्व–शब्दस्य निर्वचनप्रसङ्गे विविधानि मतानि कथितानि। यथा शु–शब्दपूर्वकाद् गत्यर्थकात् 'अय्'–धातोः श्वन्–शब्दः निष्पन्नः। श्वा यस्यार्थो भवति सुनकः क्षिप्रगामीति। द्वितीयनिर्वचनानुसारेण श्वन्–शब्दः 'शव्'–धातोर्निष्पन्नः। श्वा(सुनकः) सर्वदा गमनं करोति। श्वासग्रहणम्। सुनको महता वेगेन श्वासग्रहणं करोति। वृत्तिकारस्य दुर्गाचार्यस्य मतमिदं यत् 'शव्'–धातोरिव 'श्वस्'–धातुरपि गत्यर्थकः, 'श्वसतेर्वा गतिकर्मण एव'। निघण्टौ उच्यते 'श्वस्'–धातुः हिंसार्थकः; सुनको हिंसां करोति।

यास्काचार्यकृतं सुनकवाचकं 'श्वस्'–धातुनिष्पन्नं श्वन्–शब्दस्य निर्वचनं यथार्थमेव विज्ञानसंमतम्। यतो हि सुनकस्य वैशिष्टमेकं यथा वेगेनोर्ध्वश्वासग्रहणम्(Panting), विशेषरूपेण यदा तेषां देहतापः वर्धते तदा ते ऊर्ध्वश्वासग्रहणं कुर्वन्ति देहतापनिवारणाय। मनुष्यवत् केवलं शरीरनिःसृतं स्वेदं तान् शीतलिकर्तुं न शक्नोति। अत ऊर्ध्वश्वासग्रहणमावश्यकमिति, तेन तेषां शरीरमध्य आवश्यकवायूनामागमनं संभवति। एवं प्रकारेण ते वर्धितदेहतापं प्रशमयन्ति। अपि च उन्मत्तकाले(Excited) तथा अत्यधिकसक्रियावस्थायां(Energetic) तैः वेगेनोर्ध्वश्वासग्रहणं क्रियते।

**<u>मत्स्यः–</u>**

आचार्यो यास्कः स्वीयनिरुक्तग्रन्थे मत्स्यशब्दनिर्वचनावसरे एवमाह–

**मत्स्या मधौ उदके स्यन्दते माद्यन्तेऽन्योन्यं भक्षणायेति वा।**[20]

अस्यार्थस्त्वेवं मत्स्याः मधुनि उदके विचरन्तः परस्परं भक्षयन्तो वा हृष्टा भवन्ति। इयमेव मत्स्यशब्दस्य व्युत्पत्तिः।

मधुशब्दः गत्यर्थकस्यन्द्–धातुश्च मिलित्वा मत्स्यशब्दं व्युत्पादयति। मधुशब्दस्यार्थ उदकं जलं वा। तेन मत्स्या जलचराः, जल एव निवसन्ति। अन्यदपि हर्षार्थक–मद् इति

धातुस्तथा भक्षनार्थक–भक्ष्–धातुर्वा मिलित्वा मत्स्यशब्दं निष्पादयति। तेनास्यार्थस्तु एवं–मीनाः परस्परं भक्षयन्तो हर्षमनुभवन्ति, परस्परं जग्धा एव जीवन्तीति।

पूर्वोक्तनिर्वचनादिदं विनायासमवगम्यते यन्मीना जलजेषु प्राणिषु(Aquatic Animal) प्रमुखाः। किंच केचन विशिष्टा मत्स्याः सन्ति ये चान्यान् लघुमत्स्यान् भुक्त्वा जीवन्तीति विज्ञानाश्रितत्थ्यमेव इतर्ज्ञायते।

**शृङ्गशब्दः–**

निरुक्ते सूर्यकिरणवाचकस्य शृङ्गशब्दस्य निर्वचनं यत् प्रदत्तं यास्काचार्येण तदपि पशुशृङ्गवाचकस्य निर्वचनरूपेण प्रयोज्यमिति कैश्चित् मन्यते। तदा निर्वचनं त्वेवम्–

**शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा।**[21]

अस्यार्थस्तु एवं श्रि–धातोरुत 'शृ'–धातोरुत 'शम्'–धातोर्वा निष्पन्नः शृङ्गशब्दः। हिंसार्थं रक्षणाय वोद्गतं यद् अथवा शिरसः निर्गतं। अथवाश्रयकरणार्थकात् श्रि–धातोर्निष्पन्नस्य शृङ्गशब्दस्यार्थो भवति यद् मस्तकमाश्रित्य तिष्टति तत् शृङ्गम्। हिंसार्थकात् शृ–धातोः शम्–धातोर्वा निष्पन्नः शृङ्गशब्दः। यस्यार्थः येन हि हन्ति(येन हि हिनस्ति), शृङ्गं हिंसार्थं शिरसः निर्गतम्।

पूर्वोक्तनिर्वचनमाधुनिकविज्ञानसंमतम्। वयं जानीम यत् शृङ्गं(Horn) प्राणिषु शिरस्येव भवति। इदमेकमस्थिमयं स्थायि–निर्देशिताभिक्षेपस्वरूपं(Permanent Pointed Projection) यच्च क्यराटिन्–नामकपदार्थेन निर्मितम्। शृङ्गविशिष्टाः प्राणिनः स्वीयशृङ्गेणाक्रम्यान्नेभ्यो हिंस्रपशुभ्य आत्मानं त्रायन्ति।

**कच्छपः–**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे कच्छपशब्दस्य व्युत्पत्तिप्रसङ्गेणोक्तम्–

**कच्छपः कच्छं पाति कच्छेन पातीति वा कच्छेन पिवतीति वा।**[22]

कच्छपशब्दस्यार्थो यः कच्छमित्युक्ते मुखसंपुटं रक्षति अथवा कटाहेनेतरानङ्गान् रक्षति मुखसंपुटेन पिवतीति वा।

अत्र दृश्यते यत्–कच्छशब्दपूर्वकात् रक्षणार्थक–‘पा’–धातोस्तथा पानार्थक–‘पा’–धातोः कच्छपशब्दो व्युत्पन्नः। कच्छशब्दस्यार्थद्वयं वर्तते– मुखसंपुटः कटाहश्च। रक्षणार्थकपाधातुनिष्पन्नस्य कच्छपशब्दस्य निर्वचनं भवति यो मुखसंपुटं रक्षति। प्रसङ्गेऽस्मिन् वृत्तिकारस्य दुर्गाचार्यस्योक्तिः– **“स हि किंचिद्दृष्ट्वा स्वशरीरे एव मुखसंपुटं प्रवेशयति, संपुटे हि कच्छशब्दः प्रसिद्धः”**।[23] एतदपि विपत्काले समुपस्थिते कटाहमध्ये सम्पूर्णरूपेण प्रविश्य ते कूर्माकारेण तिष्ठन्तीति। प्रसङ्गेऽस्मिन्नुक्तं वृत्तिकारेण दुर्गाचार्येण– **“कच्छेन कटाहेन इतराण्यङ्गानि पातीति वा; स हि किंचिद्दृष्ट्वा सर्वाण्यङ्गानि कटाहे एवानुप्रवेश्य कूर्मबन्धेनैवावतिष्ठते”**।[24] पानार्थक–पा–धातुनिष्पन्नस्य कच्छपशब्दस्यार्थो यथा यो मुखसम्पुटेन उदकं पिवतीति।

यास्काचार्यकृतनिर्वचनमिदं यथार्थरूपेण वैज्ञानिकभावनायुक्तम्। यतो हि वैज्ञानिकमतानुसारेण कच्छप उरगप्राणिविशेषः(Reptile) । ते मुखसंपुटेन इत्युक्ते मुखेन मत्स्यादिभोज्यवदुदकमपि पिवन्ति। तेषां विशेषमेकं वैशिष्टं यद् विपदे समुपस्थिते आत्मरक्षार्थं ते शरीरान्तर्गते कटाहमध्ये स्वीयमस्तकं स्थापयन्तीति।

**<u>वराहः–</u>**

यास्काचार्यः निरुक्तमिति निर्वचनशास्त्रे वराहार इत्युक्ते श्रेष्ठाहारजलभोक्तृमेघवाचकस्य वराहशब्दस्य निर्वचनादनन्तरं पशुवाचक–वराहशब्दस्यापि निर्वचनमुक्तवान्। तत्र तेनोक्तम्–

**अयमपीतरो वराह एतस्मादेव; वृहति मूलानि वरं वरं मूलं वृहतीति वा।**[25]

अर्थात् पशुवाचकवराहशब्दस्य व्युत्पत्तिर्भवति– वराहारत्वादेव पशुवाचकवराहस्य वराह इति नाम। प्रसङ्गेऽस्मिन् वृत्तिकारेण स्कन्दस्वामिनोक्तम्– **“वराहारत्वाद् वराहरणत्वाद् वा”**।[26] यः विविधमूलमुत्खनति वा श्रेष्ठमूलमुत्खनति सो वराह इति।

अतो दृश्यते यत् शूकरवाचकेन वराहेन वृक्षस्य मूलरूपश्रेष्ठवस्तु आहारत्वादाहरणत्वाद्वा वराह इति नामवाच्यः। एतद्विषये वृत्तिकारस्कन्दस्वामिनोक्तम्– **“अयमपीतरोऽसुरवराहः पशुवराहो वा एतस्मादेव वराहारत्वात्वराहरणत्वाद् वा”**।[27] दुर्गाचार्येणप्युक्तं यत्– असावपि हि वरं मूलाख्यमाहारमाहरत्येव। अत उद्यमनार्थक–वृह्–धातोः वराहशब्दस्य निष्पत्तिः;

शूकरवाचको वराहोऽरण्येषु वृक्षमूलानुद्यमनं करोत्यर्थाद् मुखेन खनतीति। वृत्तिकारस्य स्कन्दस्वामिनः प्रासङ्गिक उक्तिर्भवति– **“वृहति उद्यच्छति वक्त्रेण खनति वनेषु मूलानीति वृहेर्वराह इत्यर्थः”**।[28] दुर्गाचार्य उक्तवान्– **“वृहति उद्यच्छतीत्यर्थः”**।[29] वर इति शब्दपूर्वक–वृह्–धातोरपि वराहशब्दः निष्पन्नः; पशुवराहः वरं वरं मूलं वृहति अर्थाद् वृक्षस्य श्रेष्ठं मूलं वृहतीति। वरं वरमिति शब्दद्वयादेको वरशब्दो गृह्यते। प्रसङ्गेऽस्मिन् वृत्तिकारेण स्कन्दस्वामिनोक्तम्–**“ वरशब्दाद् वृहेश्च वराहः, वरं वरमित्यकस्य वरशब्दस्य निवृत्तिः”**।[30]

यास्काचार्यकृतस्य शूकरवाचकस्य वराहशब्दस्य निर्वचनाद् वन्यशूकरस्य(Wild Boar) भोजनाभ्यासः (Food Habit) ज्ञायते। यद्यपि वराहः सर्वभोक्ता(Omnivorous), स्तन्यपायी(Mammal) प्राणिविशेषः, तथापि तस्याधिकांशभोज्यं वृक्षाश्रयमिति। तृण–वृक्षपत्र–फलैः सह वृक्षमूलं(Roots), कन्दं(Bulbs) च ते भोज्यरूपेन गृह्येते। दृढशुङ्गेन वृक्षस्य मूलमुत्पाटनं कृत्वा ते खाद्यरूपेण गृह्णन्तीति।

<u>**हंसः–**</u>

हंसशब्दस्य निर्वचनप्रसङ्गे यास्काचार्येण एवमाह–

**हंसा इव श्रेणिशो यतन्ते, हंसाः हन्तेर्घ्नन्त्यध्वानम्, श्रेणिः श्रयतेः समाश्रिता भवन्ति।**[31]

‘हंसा इव श्रेणिशो यतन्ते’– इत्यत्र हंसशब्दः ‘हन्तेः’ अर्थात् हन्–धातोरुत्पन्नः। हंसाः पथिषु गच्छन्ति। अपि च ‘श्रि’–धातोः निष्पन्नः श्रेणिशब्दः, अर्थात् समाश्रिता भवन्ति।

‘हन्’–धातोः हंसशब्दस्योत्पत्तिः। ‘हन्’–धातोरर्थद्वयं विद्यते। गत्यर्थकस्य ‘हन्’–धातोः लटि प्रथमपुरुषबहुवचनं ‘घ्नन्ति’ इति रूपम्। अत्र घ्नन्तिपदस्यार्थो गच्छन्ति; हंसाः सर्वदैव पथि गच्छन्ति। हिंसार्थकस्य ‘हन्’–धातोर्लटि प्रथमपुरुषस्य बहुवचनमपि ‘घ्नन्ति’ इति पदं भवति; हंसैः पन्था हिंस्यते। हंसैः श्रेणिः समाश्रितो भवत्यर्थाद् हंसाः श्रेणिबद्धरूपेण गच्छन्तीति।

निर्वचनादस्माद् हंसस्य(Duck) किंचिद्वैशिष्टं ज्ञायते यच्च विज्ञानसंमतमिति। यतो हि हंसो बहिर्गामी(Outgoing), सामाजिकप्राणिविशेषश्च(Social Animal)। ते सर्वदैव श्रेण्यां

तिष्ठन्ति। जलकेलिकाले(Paddling), तृणागभीरजलाशयोः खाद्यान्वेषणकाले, निद्रासमयेऽपि च ते श्रेणिबद्धरूपेण तिष्ठन्तीति।

**अहिशब्दः–**

निरुक्ते यास्काचायो मेघवाचक–अहि–शब्दस्य निर्वचनकाले सर्पवाचक–अहि–शब्दस्यापि निर्वचनं प्रदर्शितवान्। सर्पवाचक–अहि–शब्दस्य निर्वचनप्रसङ्गे तेनोक्तम्–

**अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति।**[32]

अर्थाद् मेघवाचक–अहिशब्दः अयनादित्युक्ते गमनार्थकात् 'इ'–धातुयोगान्निष्पन्नः। अस्य व्युत्पत्तिगतार्थो योऽन्तरिक्षे विचरति सो मेघवाचकः। इतरोऽर्थात् सर्पवाचकः अहिशब्दोऽपि गमनार्थकाद् 'इ'–धातोः सृष्टः, सर्पः भूमौ गच्छति विचरति वा। अथवा 'आ'–इति उपसर्गस्य ह्रस्वविधानं कृत्वा आ इत्युपसर्गपूर्वकाद् हन्–धातोरपि सर्पशब्दस्य व्युत्पत्तिः संभवति। तत्र अहिशब्दस्यार्थो भवति यो हन्तीति।

यास्काचार्यकृतमहिशब्दस्य निर्वचनं यथार्थरूपेण विज्ञानभावनाया बीजस्वरूपमिति। यतो हि प्राणिविद्यायाः(Zoology), तत्त्वानुसारेण सर्पः(Snake) पादरहितः, मांसाशी(Carnivorous), उरगप्राणिविशेषः(Reptile)। सर्पस्योल्लेखार्हं वैशिष्टं यदस्य गमनाङ्गरूपेण पादौ न स्तः। अधिकप्रजातेः सर्पस्य देहत्वचो निम्नांशः शृङ्गाकारफलकयुक्तः, यच्च गमनकाले भूमिमाकृष्य तिष्ठतीति। शरीराभ्यन्तरस्थितपेशीनामान्दोलनेन(Muscular Movement) सर्पः स्थानान्तरं गच्छति विचरति वा। एतद्विहाय सर्पो मांसाशिप्राणिविशेषः। सः शिकाररूपेण जीवितप्राणिं स्वीकरोति। आहारप्राप्त्यर्थमपि चात्मरक्षार्थं तेन प्राणिसमूहो हन्यते।

**लाङ्गूलम्–**

यास्काचार्यः तस्य विरचिते निरुक्तग्रन्थे लाङ्गलशब्दस्य निर्वचनं प्रदर्शनावसरे लाङ्गूलशब्दस्यापि निर्वचनं प्रदर्शितवान्। तेनोक्तं यत्–

**लाङ्गूलं लगतेर्लङ्गतेर्लम्बतेर्वा।**[33]

अर्थात् लाङ्गूलशब्दः लग्–धातुनिष्पन्नः वा लङ्ग्–धातुनिष्पन्न उत लम्ब्–धातुनिष्पन्नः।

सजार्थक–लग्–धातोर्व्युत्पन्नस्य लाङ्गूलशब्दस्यार्थो यत्– पृष्ठदेशान्ते सजति यत् तत् लाङ्गूलमिति। वृत्तिकारेण स्कन्दस्वामिनोक्तम्–" **लग्नं हि तत् पृष्ठस्यान्ते गोगवयाश्वादेर्भवति"**।[34] अथवा गत्यर्थकाल्लङ्ग्धातोरपि लाङ्गूलमित्यस्य सृष्टिः। लाङ्गूलं चलनस्वभावत्वाद्गतिविशिष्टमिति। अवस्रंसनार्थक–लम्ब्–धातोर्वा सृष्टः लाङ्गूलशब्दः। दीर्घत्वाल्लाङ्गूलं लम्बमानमिति। वृत्तिकारस्य स्कन्दस्वामिनः प्रासङ्गिकमुक्तिर्यत्–" **लम्बतेर्वा दीर्घत्वात्"**[35] इति।

पूर्वोक्तनिर्वचनादिदं विनायासेनावगम्यते यत् प्राणिनां पृष्ठदेशस्यान्ते स्थितमङ्गस्वरूपं लाङ्गूलमिति। पुच्छवाचकं लाङ्गूलं प्राणिनां धड्(Torso) इत्यनेन संयुक्तं स्वतन्त्रं(Distinct), नमनशीलमुपाङ्गम्(Flexible Appendage) इति। इदं पक्षि–उरग–स्तन्यपायीप्राणिनां त्रिकास्थिः(Sacrum), कक्सिक्स्(Coccyx) इत्यङ्गद्वयेन सह दृढसंबद्धं देहाङ्गस्वरूपमिति। अस्थिरं गतिमयं वा स्यात्प्राणिनां पुच्छम्(Tail) । यथा सुनकस्य पुच्छं नमनीयं(Flexible), गतिमयं(Mobile) चेति। प्राणिनां पुच्छं विविधाकारसंपन्नं भवति। कस्यचित् प्राणिनो देहाकारपरिमितं पुच्छं विद्यते। उदाहरणरूपेण वक्तुं शक्यते यत् थ्रेशर् शर्क्(Thresher Shark) इति। अपि च शरीराद्बृहदाकारपुच्छविशिष्टः प्राणी विद्यते। उदाहरणं यथा एशियन् ग्र्यास् लिजार्ड्(Asian Grass Lizard) । अस्य पुच्छाकारं पञ्चविंशति सेन्टिमिटर् इति, यच्च तस्य देहाकारात् त्रिगुणमधिकाकारविशिष्टमिति। जिराफ् इति दीर्घाकारपुच्छविशिष्टः स्तन्यपायिप्राणिविशेषः,तस्य पुच्छस्य दैर्घ्यं चतुरधिकं द्विसंख्यकं मिटर् इति। किंच जार्वोया(Jerboa), स्पाइडर् मांकि(Spider Monkey), रिव्वन्–टेल्ड्–अस्ट्रोपियापक्षिविशेषः(Ribbon-tailed Astropia) इत्येषां प्राणिनामपि सुदीर्घं पुच्छं विद्यते। यच्च तेषां देहाल्लम्बमानं भूत्वा तिष्ठतीति। अतो वक्तुं शक्यते यत् यास्काचार्यकृतं लाङ्गूलशब्दस्य निर्वचनं वैज्ञानिकभावनाया बीजस्वरूपमिति।

**वृषभः–**

यास्काचार्येण निरुक्तमित्यत्र वृषभशब्दस्य निर्वचनरूपेणोक्तम्–

**वृषभः प्रजां वर्षतीति वातिबृहति रेत इति वा तद् वृषकर्मणा वर्षणात् वृषभः।**[36]

'वृषभः प्रजां वर्षतीति वा' इत्यनेन ज्ञायते यत् वृषभ्ः संतानोत्पत्तेः रेतसेकं करोति। वृत्तिकारेण दूर्गाचार्येण प्रसङ्गेऽस्मिन्नुकम्–**" प्रजोत्पत्तिकारणं रेतः सिंचति योनौ"**[37] इति। 'अतिबृहति रेतः इति वा' अर्थादात्मानं रेतः सेक्तुमुद्यच्छति। 'तद् वृषकर्म्मा वर्षणात् वृषभः' इति वाक्यांशेन द्योत्यते यदस्य वृषभस्य कर्मसदृशं कर्म यस्य सोऽपि वर्षणाद्वृषभ इत्यभिधीयते।

अतो दृश्यते यदश्ववाचकः वृषभशब्दः वर्षणार्थकाद् वृष्–धातोरपि च उद्यमनार्थकाद् बृह्–धातोरुत्पन्नः। गोवाचकवृषभशब्दस्य निर्वचनमपि अश्ववृषवाचकस्य वृषभशब्दस्य प्रथमनिर्वचनवद्भवति। तेन षण्डवाचकवृषभशब्दस्य निर्वचनं स्यात्–'वृषभः प्रजां वर्षतीति वा' अर्थाद् वर्षणार्थकाद् 'वृष्–धातोः गोवाचकवृषभशब्दस्योत्पत्तिः। तस्मादश्ववृष इव गोवृषोऽपि प्रजानामुत्पत्त्यर्थं रेतः सिंचतीति।

गुरुत्वं द्योत्यते यच्च विज्ञानसंमतम्। तेषां जननेन्द्रियात् टेस्टोस्टेरन्(Testosterone) ,इति हर्मोनं(Hormone), निःसरति, तस्मात्ते सर्वदैव आक्रमनात्मका भवन्ति। अपि च शुक्राशयान्निःसृतः शुक्राणुः स्त्रीजननेन्द्रियनिःसृतो डिम्बाणुः– इत्यनयोर्मिलनेन तेषां प्रजानामुत्पत्तिः संभवति।

**मण्डूकः–**

**मण्डूका मज्जूका मज्जनात्, मदतेर्वा मोदतिकर्म्मणः, मन्दतेर्वा तृप्तिकर्मणः मण्डयतेरिति वैयाकरणाः, मण्ड एषामोक इति वा, मण्डो मदेर्वा मुदेर्वा।**[38]

अत्र दृश्यते यत् मण्डूकशब्दस्य पञ्च निर्वचनानि प्रदर्शितानि। प्रथमनिर्वचनानुसारेण मण्डूका इत्यतो मज्जूकाः(मज्जनशीलाः), मज्जनार्थकात् 'मसज्'–धातोर्निष्पन्नः मण्डूकशब्दः; मण्डूक उदके नित्यमग्नः स्यात्। अथवा द्वितीयनिर्वचनानुसारेण् हर्षार्थकाद् 'मद्'–धातोः सृष्टः मण्डूकशब्दः, मण्डूकः सदा प्रमुदितो भवति। तृतीयनिर्वचनानुसारेण तृप्त्यर्थक–मन्द्–धातोरुत्पन्नो मण्डूकशब्दः, उदकानां प्राचुर्यत्वात् मण्डूको नित्यतृप्तः। चतुर्थनिर्वचने वैयाकरणानामुक्तिमाह; तत्रोक्तं यत् भूषार्थक–मण्ड्–धातोर्मण्डूकशब्दस्य निष्पत्तिः, मण्डूको धातृणा विचित्ररेखाभिर्मण्डितः स्यात्। पञ्चमनिर्वचनानुसारेण मण्ड् इति

धातोरुत्तरम् ओकस् इति योगाद् मण्डूक इति, मण्ड इत्युक्ते उदकमेव तेषां निवासस्थानम्। हर्षार्थकाद् मद्–धातोरुत मुद्–धातोरुत्पत्तिः मण्डशब्दस्य इति।

मण्डूकशब्दस्य द्वितीयनिर्वचनं व्यतिरिच्य इतरेभ्यो निर्वचनेभ्यो ज्ञायन्ते मण्डूकस्य कानिचन वैशिष्टानीति। यतो हि मण्डूकः(Frog) कर्डाटाश्रेण्यान्तर्गत– कीटभोक्तृ–उभयचरप्राणिविशेषः। प्रथमे वयसि जले निवसति पुनरपि परिणतवयसि स्थलमधिवसतीति। परन्तु African Dwarf Frog समग्रजीवद्दशायां भूमावेव तिष्ठतीति, कदापि जलाशयं न गच्छति। जलाशये निवासकाले उदकप्रावल्ये सति मण्डूकः हर्षान्वितः भवति। अपि च मण्डूकानां देहत्वक् विचित्रवर्णरेखाभ्यां सज्जिता इति।

**<u>शारीरविद्याविषयकानि तत्त्वानि–</u>**

निरुक्तकारैः मानवदेहस्य विविधानामङ्गानां निर्वचनं कृतम्, यानि शारीरविद्यायाः तत्त्वरूपेण स्वीकृतानि।

यथा–आस्यशब्दस्य निर्वचनप्रसङ्गेणोक्तम्–

**आस्यमस्यते,आस्यन्दत एनदन्नमिति वा।**[39]

अर्थाद् 'अस्'–धातोरुत्पत्तिरस्य शब्दस्य। क्षेपणार्थकदिवादिगणात् 'अस्'–धातोः ण्यत्प्रत्यययोगे आस्यशब्दस्य निष्पत्तिः। वृत्तिकारेण दुर्गाचार्येणोक्तम्– **"क्षिप्यते ह्येतदाभिमुख्येनान्नम्"**[40] इति अर्थाद् यत्रान्नं निक्षिप्यते। द्वितीयमतानुसारेण आ+स्यन्द् धातोः ड–प्रत्यये कृते आस्यशब्दस्योत्पत्तिः। आ+स्यन्द्धातोरकर्मकत्वात् णिजर्थरूपेण गृहीत्वा सकर्मकत्वसाधने आस्यन्दत इति पदस्य रूपं भवति आस्यन्दयति अर्थादार्द्रं सरसं वा करोति। अस्य कर्म भवति 'एनत्'(आस्यं मुखं वा), अपि च कर्तृपदं भवति अन्नम्। तस्मात् आ+स्यन्द्–धातोः निष्पन्नस्य आस्यशब्दस्यार्थो भवति अन्नं यदार्द्रं सरसं वा करोति। वृत्तिकारेण दुर्गाचार्येण 'एनत्' इति द्वितीयाया एकवचनान्तं पदं प्रथमाया एकवचनरूपेण गृहीतम्। तेन अन्नमिति पदं कर्मरूपेण परिवर्तितं जातम्। तस्य मते आस्यन्दत एनदन्नमित्यस्यार्थो भवति अन्नं प्राप्य एनत्(आस्यम्) आस्यन्दते स्रवति इति। स्कन्दस्वामिना आस्यन्दत एतदन्नमिति वा अनेनरूपेणास्य शब्दस्य ग्रहणं कृतम्। तेनैतदन्नं

प्राप्यास्यन्दते अर्थादन्नं प्राप्यास्यं रसयुक्तं भवति उत अन्नमेतदास्यन्दते(आस्यन्दयति) अर्थादेनदन्नं रसयुक्तं करोति, एवं व्याख्या कृता।

यास्काचार्यकृतनिर्वचनस्यानुवृत्तिः आधुनिकमानवशारीरविद्यायां दृश्यते। यतो हि मानवशरीरस्य प्रथमा पौष्टिकनालिका (Alimentary Canal) मुखमिति(आस्यम्)। मानवशरीरे प्रयोजनीयशक्तिप्राप्त्यर्थं शरीरस्य बृद्ध्यर्थं च गृहीतं खाद्यवस्तु प्रथमे मुखे निक्षिप्तं भवति। ततः गृहीतस्य खाद्यवस्तुनः चर्वनकाले मुखस्थितात् लालाग्रन्थेः (अधोहनोरुभयपार्श्वस्थितः साव्म्याक्सिलारिग्रन्थिः, मुखगह्वरस्य भूमिस्थितायाः मिउकाशपर्दायाः नीचस्थितः साब्लिङ्गुयाल्ग्रन्थिः) लालारसं निःसृत्य खाद्यवस्तुपरिपाके सहायतां करोति। अस्य लालामिश्रणस्य सर्वाः क्रियाः मुखे खाद्यवस्तुनः स्थापनादनन्तरमेव भवन्ति।

**<u>शिरः–</u>**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे आदित्यवाचकस्य शिरस्–शब्दस्य निर्वचनकाले मनुष्यशिरोवाचकस्य शिरस्–शब्दस्यापि व्युत्पत्तिप्रदर्शनं कृतम्। तत् निर्वचनं भवति–

**इदमपीतरच्छिर एतस्मादेव समाश्रितान्येतदिन्द्रियाणि भवन्ति।**[41]

वाक्यस्यार्थो भवति अन्यत् शिरः अर्थात् मनुस्यशिरःशब्दः 'शी'धातुनिष्पन्नः। इन्द्रियसमूहः एतदाश्रित्य तिष्ठन्ति। आदित्यवाचकशिरःशब्देव मनुष्यशिरःशब्दस्योत्पत्तिः शीधातोरुत्तरं ऊणदिगणीय–असुन्प्रत्ययययोगेन। चक्षुरादीनि सर्वाणि इन्द्रियाणि शिरसि मस्तकमाश्रित्यैव तिष्ठन्ति। प्रसङ्गेऽस्मिन् दुर्गाचार्यस्योक्तिः यथा–

**"'समाश्रितानि' हि 'एतद्' उत्तमाङ्गम् 'इन्द्रियाणि' चक्षुरादीनि भवन्ति– इति शिर उपपत्तिः"।**[42]

उक्तमिदं तत्त्वं तु वैज्ञानिकतत्त्वस्य वाहकरूपेण गण्यते। वैज्ञानिकभावनायां मनुष्यस्य शिरः मस्तिष्कं(Brain) वा स्नायुतन्त्रस्य नार्भ्तन्त्रस्य(Nervous System) निर्देशककेन्द्रम्। इदं तु संज्ञावहाङ्गेभ्यः(Sensory Organs) उद्दीपनां स्वीकृत्य एतेष्वङ्गेषु निर्देशं तथ्यं वा

प्रेरयति। अनेन शिरः तस्य विविधांशैः इन्द्रियसमूहं कार्यं कारयति। तद्यथा –हस्तेभ्यः लेखनम्, नेत्राभ्यां दर्शनम्, कर्णाभ्यां श्रवणम्, चिन्तनमिति। अतः मनुष्यशिरः इतरेषामङ्गाणामाश्रयस्वरूपमिति।

**<u>ग्रीवाशब्दः–</u>**

ग्रीवाशब्दस्य व्युत्पत्तिरूपेणोक्तं निरुक्तकारेण यास्काचार्येण –

**––––ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वा।**[43]

ग्रीवा–शब्दः निगरणार्थकगृधातोः अथवा शब्दकरणार्थकगृधातोः उत ग्रहणार्थकग्रह्–धातोः निष्पन्नः।

तस्य मते निगरणार्थकस्य वा शब्दकरणार्थकस्य उत ग्रहणार्थकस्य गृ–धातोरुत्तरं ऊणादिगणीय–वन्–प्रत्यययोगे ग्रीवाशब्दस्योत्पत्तिः। इत्युक्ते येन खाद्यवस्तुनः गिलनं, निगरणं वा शब्दोच्चारणं संभवति अथवा यस्मिन्नाबद्धखाद्यवस्तु गृहीतं भवति तदङ्गमेव ग्रीवेति उच्यते। प्रसङ्गेऽस्मिन् दुर्गाचार्येणोक्तम्–**"तया हि गिलत्यन्नम्, तया हि शब्दो गीर्यते, तया ह्युदकादादि गृह्यते"** ।[44]

यास्काचार्येण ग्रीवाशब्दस्य व्युत्पत्तिकाले ग्रीवा अर्थात् कण्ठदेशस्य द्वे प्रधाने कार्ये उच्यते, तद्यथा खाद्यवस्तुनः गिलनं शब्दकरणमिति वा एतौ विषयौ तु वैज्ञानिकतत्त्वभूतौ इति। यतो हि वैज्ञानिकतत्त्वानुसारेणास्माभिः ज्ञायते यत्– कण्ठदेशस्य द्वौ मूलांशौ– गलविलः(Pharynx) वाग्यन्त्रम्(Larynx) च । मुखेन चर्वितं खाद्यवस्तु अनेन गलविलमाध्यमेन ग्रासनालीं प्रति गच्छति। खाद्यवस्तुनः गिलने सहायतां करोति। स्वरयन्त्रस्थितः स्वरतन्त्री(Vocal Cord) शब्दकरणाय सहायका इति।

**<u>चर्मशब्दः–</u>**

यास्काचार्येण चर्मशब्दस्य व्युपत्तिरूपेणोक्तम्–

**चर्म चरतेर्वोच्चृत्तं भवतीति वा।**[45]

अर्थात् चर्मशब्दः चर्–धातुनिष्पन्नः उत यदुत्कर्तितं भवति तत् चर्मनाम्ना ज्ञायते।

चर्मशब्दस्य निष्पत्तिः गमनार्थकात् चर्-धातोरुत विस्रंसनार्थकात् चृत्-धातोरिति। चर्-धातुनिष्पन्नस्य चर्मशब्दस्य व्युत्पत्तिः भवति-यत् सर्वशरीरगतं भवति अर्थात् सर्वशरीरव्याप्य तिष्ठतीति(चरितं हि तत् सर्वस्मिन् शरीरे गतमित्यर्थः)। चृत्-धातुनिष्पन्नस्य चर्मशब्दस्य व्युत्पत्तिः यथा-यद् विस्रंसितं भवति अर्थात् शरीरादुत्कर्तितमिति।

यास्काचार्यकृतभावनाया अनुवृत्तिराधुनिकविज्ञानभावनायामपि दृश्यते। जीवविद्यानुसारेण मानवशरीरे बहिरावरणीयतन्त्रस्य(Integumentary System) प्रधानतममङ्गं चर्मेति। एतद् मानवशरीरस्य सर्वबृहदङ्गम्। चर्म मानवशरीरस्य बहिरावरणमिति। एतेन देहान्तर्गतकोमलांशस्याच्छादनं संभवति, एतद्विहाय देहतापनियमने रेचनवस्तुक्षरणे च चर्मस्य भूमिकास्ति। शरीरात् चर्मस्योत्कर्तनमपि स्यात्, विविधसमये मानवशरीरात् मृतकोषरूपेण चर्म उत्कर्तितमिति।

**<u>श्मश्रुशब्दः-</u>**

श्मश्रु-शब्दस्य व्युत्पत्तिरूपेण यास्काचार्यस्योक्तिः-

**श्मश्रु लोम श्मनि श्रितं भवति।**[46]

श्मश्रु-शब्दस्यार्थः लोम यत् श्मनि इत्युक्ते शरीरे आश्रितमिति। श्मन्+श्रि+डुप्रत्यययोगात् श्मश्रु-शब्दस्य निष्पत्तिः। तस्यार्थः जायते लोमसमुहः शरीरमाश्रयते।

वास्तविकरूपेणापि दृश्यन्ते मनुष्याणां देहत्वके बहूनि लोमानि, यैः देहतापस्य नियमनं संभवति।

**<u>अक्षिः-</u>**

यास्काचार्येण 'अक्षिशब्दस्य' निर्वचनरुपेण उच्यते-

**अक्षि चष्टे।**[47]

अर्थात् 'चक्षिङ्'-धातोः अक्षिशब्दः निष्पन्नः। दर्शनार्थकात् 'चक्षिङ्'-धातोः क्सि-प्रत्यययोगे 'अक्षि'शब्दस्योत्पत्तिः। अत्र व्युत्पत्तिगतार्थः भवति- दृश्यते अनेन इति।

निर्वचनादस्मात् दर्शनेन्द्रियरूपेण नेत्रयोः गुरुत्वं द्योत्यते। चक्षुद्वयेनैव बहिर्जगतः दृश्यानि अस्माभिरनुभूयन्त इति वैज्ञानिकतत्त्वं ज्ञायते।

**अन्धशब्दः–**

निरुक्तकारेण यास्काचार्येण तमोवाचकस्य अन्धशब्दस्य निर्वचनादनन्तरं दर्शनाभाववाचकस्य अन्धशब्दस्यापि निर्वचनं प्रदर्शितम्। तत्रोक्तम्–

**अयमपीतरोऽन्ध एतस्मादेव।**[48]

वृत्तिकारेण स्कन्दस्वामिना 'एतस्मात्'इति पदस्यार्थरूपेण 'दर्शनाभावात्'इत्युक्तम। अर्थाद्दर्शनाभावद्योतनार्थमपि अन्धशब्दः प्रयुज्यते। चक्षुहीनार्थे प्रयुक्तस्य 'अन्ध'–शब्दस्योत्पत्तिः नञ् इति उपसर्गपूर्वकात् 'ध्यै'– धातोः। चक्षुहीनेन ध्यानमर्थाद्दर्शनं न संभवति, कोऽपि दृष्टिशक्तिर्नास्ति चक्षुहीनस्य।

निर्वचनमिदमाधुनिकविज्ञानभावनायाः भित्तिस्वरूपम्। यतो हि, तत्र अन्धशब्देन नेत्राभ्यां पूर्णरूपेण दर्शनाभावत्वं द्योत्यते। अपि च अन्धमानवेन आलोकान्धकारयोर्विशिष्टज्ञानं न संभवति।

**काणः–**

यास्काचार्यपूर्वकालिकेन निरुक्तकारेण औपमन्यवेन काणशब्दस्यार्थरूपेणोक्तम्–

**-------काणो विक्रान्तदर्शन इत्यौपमन्यवः।**[49]

अर्थात् तस्य मते काणशब्दस्यार्थः विक्रान्तदर्शनः। क्रम्–धातोः काणशब्दः निष्पन्नः; क्रान्त इत्यस्मात् काणशब्दः। वृत्तिकारदुर्गाचार्यस्य मते विक्रान्तशब्दस्यार्थो विकृत इति(विक्रान्तगतिर्विकृतगतिरित्यर्थः)। अतः विक्रान्तदर्शनः इत्युक्ते विकृतदृष्टिरित्यर्थः द्योत्यते। दुर्गाचार्येण उक्तम्–**विक्रान्तं हि तस्य दर्शनं भवति एकीभुतत्वात्।**[50]। 'काणोऽविक्रान्तदर्शनः' ईदृशं पाठान्तरमपि दृश्यते। अविक्रान्तदर्शनः इत्यस्यार्थः अनपसृतदृष्टिः। दुर्गाचार्येण प्रसङ्गेऽस्मिनुक्तम्– **"काणः अविक्रान्तदर्शन इति वा मन्दचक्षुष्ट्वात्"।**[51] काणव्यक्तेः मन्दतावशतः चक्षुषोः दृश्यमानता दूरगता न भवति।

यास्काचार्यस्य मते काणशब्दस्यार्थः –

**कणतेर्वास्यादणूभावकर्मणः__________दर्शनाणूभावात् काणः।**[52]

अण्वार्थकात् अल्पार्थकात् कण्–धातोः वा काणशब्दस्य निष्पत्तिः। अतः दृष्टिशक्तेरणुभावत्वस्य द्योतनार्थं काणशब्दस्य प्रयोगः दृश्यते।

पूर्वोक्तनिर्वचनद्वयं यथार्थरूपेण वैज्ञानिकभावनाया आधारस्वरूपम्, यतो हि वैज्ञानिकदृष्ट्या काणा(One Eyed) इत्यनेन ज्ञायते स्वल्पदृष्टिशक्तिसम्पन्नो मनुषोऽर्थाद्यस्य स्वाभाविकदृष्टिशक्तिर्नास्ति, अपि च यस्येकं चक्षुः सक्रियमर्थाद् यश्चक्षुषा द्रष्टुं शक्नोति, नापरेणेति।

**<u>हनुः नासिका च–</u>**

यास्काचार्येण हनुनासिकयोः पदयोः व्युत्पत्तिप्रसङ्गेणोक्तम्–

**हनुर्हन्ते नासिका नसतेः ।**[53]

अर्थात् 'हन्'–धातुनिष्पन्नः हनुशब्दः, अपि च नासिकाशब्दस्योत्पत्तिः 'नस्'–धातोः। 'हन्'–धातुनिष्पन्नहनुशब्दस्यार्थो येन खाद्यवस्तुनः चर्वनं संभवतीति। प्राप्त्यर्थकात् 'नस्'–धातोर्निष्पन्नस्य नासिकाशब्दस्यार्थो येन गन्धः प्राप्यते उत गन्धं प्रति यस्य नमनं भवति। वृत्तिकारेण स्कन्दस्वामिना नासिकाशब्दस्यार्थप्रसङ्गे उक्तम्– **गच्छति प्राप्नोति वा गन्धं प्रति नमतीति वा नासिका।**[54]

यास्काचार्यकृतनिर्वचनद्वयाद् हनुर्नासिकयोः विज्ञानसंमतं कार्यं ज्ञायते यतो हि शारीरविद्यानुसारेण मुखगह्वरस्थितेन चोयालद्वयेन अपि च चोयालस्थितदन्तसमूहेन गृहीतखाद्यवस्तुनः चर्वनं संभवति। नासिका मानवदेहस्यान्यतममेकं ज्ञानेन्द्रियम्। श्वासग्रहणव्यतिरेकेन नासिकायाः अपरमेकं कार्यं घ्राणग्रहणम्। नासिकया गन्धग्रहणेन नासिकास्थितःअल्फ्याक्टरिकोषसमूहः उद्दीप्यते। एतत्घ्राणोद्दीपनं अल्फ्याक्टरिस्नायुना यदा मस्तिष्कस्थितं घ्राणकेन्द्रं प्राप्नोति तदा अस्माभिः घ्राणग्रहणं संभवति।

**<u>बधिरः–</u>**

निरुक्तमित्यत्र यास्काचार्येण बधिरशब्दस्यार्थः कृतः–

**बधिरो बद्धश्रोत्रः ।**[55]

अर्थात् बधिरः बद्धकर्णः श्रवणशक्तिहीनः। 'बन्ध्'–धातोः बधिरशब्दस्य निष्पत्तिः, बधिरस्य शाब्दबोधः न भवति।

निर्वचनमिदं वैज्ञानिकतत्त्वसमन्वितम्, यतो हि बधिरशब्देन सम्यग्रुपेण श्रवणशक्तिहीनता द्योत्यते। कस्मादपि कारणात् मनुष्यस्य श्रवणशक्तौ लये प्राप्ते बधिरः उच्यते।

**योनिः**

यास्काचार्यः स्त्रीजननेन्द्रियवाचकस्य योनिशब्दस्य व्युत्पत्तिप्रसङ्गे उक्तवान्–

**स्त्रीयोनिरभियुत एनां गर्भः।** [56]

अर्थात् स्त्रीजननेन्द्रियवाचकः योनिशब्दः, येन सह गर्भः गर्भाशयः वा युतः संमिलित इति। मिश्रणार्थकात् युधातोः योनिशब्दस्योत्पत्तिः। एतेन सह गर्भस्य संयोगत्वात् योनिनामवाच्य इति।

यास्काचार्यकृत–स्त्रीजननेन्द्रियवाचकयोनिशब्दस्य निर्वचनं विज्ञानदृष्ट्या यथार्थमेव। योनिः स्त्रीदेहस्य गौणजननाङ्गविशेषः। अयं गर्भाशयेन सह संसृष्टः सर्विक्स् इत्यस्मात् परवर्ती कश्चनः नलाकारांशः, यस्य दैर्घ्यं चतुर्भ्यो दशसेमिपर्यन्तम्। योनिः(Vagina) योनिरन्ध्रेण देहाद् बहिरुन्मुक्तः। तेन प्रसवकाले परिणतशिशुः अनेन मार्गेण गर्भाद् बहिरायाति। अतः गर्भः योनिना युज्यते इति।

गर्भः–

निरुक्ते सर्वभूतान्तःसंचारिदेवतावाचक–गर्भशब्दनिर्वचनात् परं यास्केन स्त्रीगर्भस्यापि व्युत्पत्तिः निर्णीता। अस्मिन् प्रसङ्गे तेनोक्तम्–

**यदा हि स्ती गुणान् गृह्णाति गुणाश्चास्या गृह्यन्तेऽथ गर्भो भवति।** [57]

अत्र गुणशब्देन पुरुषस्य शुक्रस्वरूपाः गुणाः गृह्यन्ते, अथवा यदि अस्य स्वाभाविकार्थः स्वीक्रियते तदा वाक्यस्यार्थस्तु एवं भवति–

यदा पुरुषस्य शुक्ररूपगुणाः स्त्रिया गृह्यन्ते, स्त्रीणां शोणितरूपान् गुणानपि पुरुषबीजं गृह्णाति तदा गर्भाधानं संभवति अथवा यदा प्रेमवशात् स्त्रिया पुरूषगुणाः गृह्यन्ते, पुरुषाः स्त्रीगुणान् स्वीकुर्वन्ति तदा अन्योन्यानुरागजनितप्रमादाद् गर्भोत्पत्तिर्भवति। अतः दृश्यते यद् ग्रहणार्थकात् ग्रह्–धातोः गर्भशब्दस्य निष्पत्तिः।

यास्काचार्यकृता इयं व्युत्पत्तिराधुनिकविज्ञानभावनाया आधारस्वरूपा। यतो हि तत्रोच्यते पुरुषदेहस्य मुख्यजननाङ्गं शुक्राशयः(Testis), स्त्रीणां डिम्बाशयः(Ovary) इति। शुक्राशयात् शुक्राणु उत्पद्यते डिम्बाशयात् डिम्बाणुः च। यौनमिलनकाले शुक्राणुः शिश्ननिःसृतवीर्येण स्त्रीयोणिं प्रविशति। ततः यथाक्रमेण जरायुं तथा फ्यालोपियान्नालिकां प्रविशति। तत्र तन्नालिकायाः आम्पुलाख्येस्थाने डिम्बाणु इत्यनेन सह मिलनेन गर्भोत्पत्तिः भवति।

**<u>नाभिः–</u>**

यास्काचार्यविरचिते निरुक्तग्रन्थे वैदिकमन्त्रान्तर्गतशब्दरूपेण नाभिशब्दस्यापि निर्वचनं दृश्यते। तत्रोक्तम्_

**––––नाभिः सन्नहनान्नाभ्या सन्नद्धा गर्भा जायन्त इत्याहु––––**[58]

अर्थात् सम्यग्रूपेण नहनाद् बन्धनादेव नाभ्या नाभित्वम्। दृश्यते यत् नाभिबद्धावस्थायां गर्भस्थशिशुः जायते। स्कन्दस्वामिना कथितम्– **प्रत्यक्षेणापि चैनत् स्वयमपि दृश्यत एव।**[59]

बन्धनार्थक–नह्–धातोरुत्तरम् इङ्–प्रत्यययोगेन कर्तृवाच्ये नाभिशब्दस्य निष्पत्तिः। नाभिशब्दस्यार्थो नहनहेतुरुत बन्धनकर्त्ता। नाभिः नह्यति बध्नाति वा।

यास्काचार्यकृतं नाभिशब्दस्य निर्वचनं वैज्ञानिकदृष्ट्या यथार्थमेव। यतोहि निषिक्तडिम्बाणुः(zygote) भिन्नासु दशासु भ्रूणाकारं प्राप्य जरायुप्राकारे नाभिरज्जुना किंचिल्लम्बवानिव तिष्ठति। तदा फिटल्–नामकप्रावारकेन(Foetal Membranc) वेष्टितो

भवति। नाभिरज्जुनैव भ्रूणे तथा प्लासेन्टा– इत्यत्रावश्यकपदार्थानां विनिमयः संभवति। प्रसवकाले च परिणतः शिशुः नाभिबद्धो भूत्वा जनिं लभते।

**<u>शिश्नः–</u>**

यास्काचार्यः शिश्नशब्दस्य निर्वचनप्रसङ्गे उक्तवान्–

**शिश्नः श्नथते इति।**[60]

अस्यार्थः शिश्नशब्दः ताडनार्थकश्नथ्–धातुनिष्पन्नः। स्कन्दस्वामिसमयस्तु एवं–**" ताड्यते हि तेन स्त्रीसंभोगकाले"।**[61]

पूर्वोक्तनिर्वचनादिदमवगम्यते यच्च विज्ञानसंमतमपि तद्धि– शिश्नः(Penis) पुरुषाणां पेशिबहुलं सङ्गमाङ्गमिति यस्यान्तः मुत्रजनननालिके विस्तृते स्तः। मिथुनकाले शिश्नाघातेनैव शुक्राणुः वीर्येण सह स्त्रीयोनिं प्रविशतीति।

**<u>जरायुः–</u>**

यास्काचार्येण तस्य विरचिते निरुक्तमित्यत्र आदित्यवाचकवेनदेवतायाः स्तुतिकाले कथितजरायुशब्दस्यापि व्युत्पत्तिः प्रदर्शितम्। तेनोक्तम् यत्–

**जरायुर्जरया गर्भस्य जरया यूयत इति वा।**[62]

अस्य वाक्यस्यार्थो यथा–गर्भस्थितजराया उत जराशब्देन सह मिश्रणार्थक–'यू'–धातोः योगेन जरायुशब्दस्योत्पत्तिः। जराशब्दस्यार्थो जीर्णताप्राप्तिः– उपचयवृद्धिः परिणामः वा। गर्भस्य यथा जरा इत्युक्ते उपचयरूपेण वृद्धिः परिणामः वा भवति जरायोरपि तथाकारपरिवर्तनं भवति। अतो जराशब्दादेव जरायुशब्दस्य निष्पत्तिः। प्रसङ्गेऽस्मिन् वृत्तिकारः स्कन्दस्वामी उक्तवान्– **"यथा जीर्यति परिणमते उपचयरूपेण गर्भस्तथा तथा जरतीति जरायुर्गर्भस्य वेष्टकः"।**[63] वृत्तिकारेण दुर्गाचार्येणापि कथितम्– **"तद्धि जरया गर्भस्य भवति, यथा यथा गर्भो भवति तथा तथा तदुत्पद्यते"।**[64] अपि च उक्तं यास्काचार्येण– जरा+मिश्रणार्थक–'यू'–धातोर्निष्पन्नो जरायुशब्दः। तेन जरायुशब्दस्यार्थो

यो जरा अर्थात् परिणतगर्भेन सह मिश्रितं भवति अर्थात् परिणतगर्भं वेष्टयतीति। विषयेऽस्मिन् स्कन्दस्वामिन उक्तिः– **"यूयते मिश्रीयते परिणममानं गर्भं वेष्टयतीत्यर्थः"**।[65]

निर्वचनमिदमाधुनिकविज्ञानभावनाया बीजस्वरूपम्। यतो हि जरायुः स्त्रीणां देहान्तर्गतश्रोणिगह्वरस्थितः मुत्रमलाशयोः मध्यवर्ती नासपातिसदृशाङ्गविशेषः। गर्भाधानादनन्तरं निषिक्तडिम्बाणुः भ्रूणाकारं प्राप्य जरायुप्राकार एव तिष्ठति। गर्भावस्थायां(Pregnancy) भ्रूणाकारे वृद्धौ सति जरायु(Uterus) इत्यस्याप्याकारवृद्धिः भवति। प्रसवेन परिणतशिशोः जन्मनादनन्तरं जरायुः क्रमेण पूर्वावस्थां प्राप्नोति।

**कर्णशब्दः–**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे कर्णशब्दस्य निर्वचनप्रसङ्गे पूर्वकालिकस्याग्रायणाचार्यस्य निर्वचनमप्युल्लिखितम्। आग्रायणाचार्यकृतनिर्वचनं यत्–

**ऋच्छतेरित्याग्रायणः**।[66]

अर्थादाग्रायणाचार्यस्य नये 'ऋ'–धातोः कर्णशब्दस्य निष्पत्तिः। गत्यर्थकात् 'ऋ'–धातोरुत्तरं 'नन्'–प्रत्यययोगे सति पृषोदरादित्वात् कर्णशब्दो निष्पन्नः। 'ऋ'–धातुनिष्पन्नस्य कर्णशब्दस्यार्थो यत्–ऋच्छन्ति गच्छन्ति शब्दा एतौ।

यास्काचार्येण कर्णशब्दस्य निर्वचनरूपेणोक्तम्–

**कर्णः कृन्ततेर्निकृत्तद्वारो भवति**।[67]

अर्थात् कर्णशब्दः 'कृत्'–धातोर्निष्पन्नः। कर्णो निकृत्तद्वारो भवति।

अत्र दृश्यते यत्–छेदनार्थक–'कृत्'–धातोः 'नन्'–प्रत्यये कृते सति पृषोदरादित्वात् कर्णशब्दस्योत्पत्तिः। तेन कर्णशब्दस्यार्थः कृत्तः छिन्न इति। कर्णस्य द्वारप्रदेशः निकृत्तः छिन्नः वा भवति। उणादिसूत्रकारेण विक्षेपार्थकात् 'कृ'–धातोर्कर्णशब्दस्योत्पत्तिरित्युक्तम्। तेन 'कृ'–धातुनिष्पन्नस्य कर्णशब्दस्यार्थः कृतम्– यत्र वायुभ्यां शब्दो विक्षिप्तो भवति।

पूर्वोक्तनिर्वचनद्वयं पर्यालोच्य श्रवणेन्द्रियरूपेण कर्णयोर्गुरुत्वं ज्ञायते। मानवशरीरे स्थितौ कर्णौ बहिर्जगत्युत्पन्नानां शब्दानां तरङ्गसमूहं स्वीकुरुतः। कर्णाभ्यामस्माकं शाब्दबोधः संभवति। कर्णयोर्द्वारप्रदेशावुन्मुक्तौ भवतः, ताभ्यां शब्दाः कर्णद्वये प्रविशन्तीति।

**तालुः–**

निरुक्तमिति निर्वचनशास्त्रे यास्काचार्यः तालुशब्दस्य निर्वचनप्रसङ्गे कथितवान्–

**तालु तरतेस्तीर्णतममङ्गम् लततेर्वा स्याद् लम्बकर्मणो विपरीताद्__**[68]

दृश्यते यत्–तालुशब्दः 'तृ'–धातोर्निष्पन्नः। अत्र 'तृ'–धातुः तरणार्थकः। अतः तालु इति तीर्णतमं विस्तीर्णतममङ्गस्वरूपम्। वृत्तिकारेण स्कन्दस्वामिना प्रसङ्गेऽस्मिनुक्तम्– **"विस्तीर्णतमं हि तदास्यान्तर्गतेभ्योऽङ्गान्तरेभ्यः"**। [69] अर्थादास्यान्तर्गतेष्वङ्गेषु ताल्वेव तीर्णतममिति। अथवा विपर्ययवर्णात् लम्बनार्थकात् 'लत्'–धातोर्तालुशब्दस्योत्पत्तिः। 'लत्'–धातोर्वर्णविपर्ययात्तालुशब्द इति। 'लम्ब्'–धातोरर्थोऽवस्रंसनमवलम्बनं वा। मुखगह्वरे तालुरवलम्बितरूपेण स्थापित इति।

यास्काचार्यकृतं तालुशब्दस्य निर्वचनं यथार्थरूपेणाधुनिकविज्ञानभावनाया आधारस्वरूपम्। यतो हि मुखविवरस्य विस्तृततमः प्रदेशः ताल्विति(Palate) उच्यते। अर्थात् तालु मुखविवर अवलम्बितरूपेण तिष्ठति। अस्य तालोः अग्रदेशः कठोरतालु(Hard Palate) इति नाम्ना ज्ञायते, अपि च पश्चाद्देशः कोमलतालु(Soft Palate) इति।

**जिह्वा–**

जिह्वाशब्दस्य व्युत्पत्तिप्रसङ्गे यास्काचार्यस्योक्तिर्यत्–

**जिह्वा जोहुवा।**[70]

अर्थात् जिह्वा इयुक्ते जोहुवा, आहुतिदाता होता वा। यङ्लुगन्ताद् 'हु'–धातोर्जिह्वाशब्दस्य निष्पत्तिः; जिह्वया प्राणी स्वात्मन्यन्नस्याहुतिदानं करोति। अथवा यङ्लुगन्ताद् 'ह्वे'–धातोर्जिह्वाशब्दो निष्पन्नः; जिह्वया आह्वयतीति। जोहुवाशब्दैव जिह्वा इत्याकारं प्राप्नोति।

प्रसङ्गेऽस्मिन् वृत्तिकारो दुर्गाचार्य उक्तवान्– **“सा हि जोहुवा सती जिह्वा इत्युच्यते; तया प्राणिनोऽन्नमात्मन्येव जुह्वति अथवा तया आह्वयन्तीति जोहुवा”।**[71]

निर्वचनादस्माज्जिह्वायाः कार्यद्वयं ज्ञायते यच्च विज्ञानसंमतम्। तद्यथा खाद्यवस्तुनः चर्वने गलाधःकरणे च जिह्वा सहायका भवति। अपि चाभिवादने इत्युक्ते वाक्यकथने सहायतां करोतीति।

मण्डूकशब्दस्य निर्वचनरूपेण यास्काचार्येण एवमाह–

**अणुजीवविद्याविषयकानि तत्वानि–**

यास्काचार्येण विविधस्याणुजीववाचकपदस्यापि निर्वचनं कृतं तस्य विरचिते निरुक्तग्रन्थे। तत्र निर्वचनाद्विविधानि तत्त्वानि प्राप्तानि, यानि कीटाणुविज्ञाने अणुजीवविद्यायां वालोचितानीति।यथा–

**कृमिः–**

यास्काचार्यः निरुक्तमिति निर्वचनशास्त्रे कृमिशब्दस्य निर्वचनं प्रर्दर्शितम्। तत्र तेनोक्तं यत्–

**कृमिः क्रव्ये मेद्यति क्रमतेर्वा स्यात् सरणकर्म्मणः क्रामतेर्वा।**[72]

अत्र दृश्यते यत् यास्काचार्येण त्रिविधं निर्वचनं कृतम्। प्रथमानुसारेण क्रव्यशब्दः स्नेहार्थक–‘मिद्’–धातुश्च मिलित्वा कृमिशब्दं निष्पादयति। अर्थात् कृमिः क्रव्यमाममांसंप्रत्यनुरक्तम् स्नेहपरायणमिति। प्रसङ्गेऽस्मिन् वृत्तिकारः स्कन्दस्वाम्युक्तवान्– **“मेद्यति स्निह्यति गृध्यत्यर्थः”**। [73] द्वितीयनिर्वचनानुसारेण सरणार्थकात् ‘क्रम्’–धातोः कृमिशब्दो निष्पन्नः। एतेषां सरणं भूमौ भवत्यर्थाद् वक्षेण सरणं गमनं वा संभवति। वृत्तिकारेण स्कन्दस्वामीमतेन ‘सरणकर्म्मण’ इत्यस्य हिंसार्थस्य इत्यपि पाठान्तरं दृश्यते। तेनार्थो जायते यत् कृमिर्हिंसां करोतीति । तृतीयनिर्वचनानुसारेण पादविक्षेपार्थकात् ‘क्रम्’–धातोः कृमिशब्दस्योत्पत्तिः। अर्थात् कृमिः पादविक्षेपं करोति गच्छतीति वा।

यास्काचार्यकृतं कृमिशब्दस्य द्वितीयनिर्वचनं वैज्ञानिकतत्त्वसमन्वितम्। यतो हि कृमिः(Helminth) परजीविप्राणी। अस्य गमनाङ्गरूपेण पादौ न स्तः।

देहभित्तिकायामनुदैर्घ्यपेशिः(Longitudinal Muscles) विद्यते। वृत्ताकारपेशिर्नास्ति। एतेषां देहः पुरुः स्वच्छश्च किउटिकल्–इत्यनेन आवृतोऽस्ति। किउटिकलस्थित–फाइवार्–इत्यनेन कृमिः स्थानपरिवर्त्तनं करोति। अतः कृमिरुरसा सरतीति निर्वचनं विज्ञानसंमतमिति। कृमिर्हिंसां करोत्यर्थाद् हिंसार्थकात् 'क्रम्'–धातुयोगादुत्पन्नस्य कृमिपदस्य निर्वचनं विज्ञानसंमतम्। यतो हि प्रायः सर्वेऽपि कृमयोऽन्तःपरजीविनो भवन्ति। मनुष्य–गो–शूकराणां पोषकानां देहाभ्यन्तरेषु तेषां जीवनचक्रं संपूर्णं भवति। एतैर्मनुष्या विविधै रोगैराक्रान्ता भवन्ति। युगपदेतेषां रोगानां नाम भवति हेल्मिन्थिसिस्(Helminthiasis) । कृमयो मनुष्याणां बृहदन्त्रे स्थित्वा उदरपीडा–वमन–चक्षूरोगकंजांटिभाइटिस्–अनिद्रा–रक्ताल्पतानामपि च मानसिकव्याधेः कारणं भवन्ति। अतः कृमिर्हिनस्तीति वैज्ञानिकरूपेण सत्यमिति।

**<u>वम्रीशब्दः–</u>**

वम्रीशब्दस्य निर्वचनप्रसङ्गे यास्काचार्येणोक्तम्–

**वम्र्यो वमनात्।**[74]

वम्री इति नाम वमननिबन्धादिति।

अर्थाद् वम्रीशब्दः वमनार्थकादौणादिक–'वम्'–धातोर्निष्पन्नः। वम्री जलं वमित्वा मृत्तिकामार्द्रं करोतीति। वम्रशब्दस्य स्त्रीलिङ्गे वम्री इति शब्दः भवति।

वम्रीशब्दस्य निर्वचनाद् वम्री इत्युक्ते सीमिकाया(Termite) वैशिष्टमेकं ज्ञायते यच्च वैज्ञानिकभावनायुक्तमिति। वम्री आर्थ्रोपोडाश्रेण्यन्तर्गता कीटविशेषा। वम्र्या विविधाः प्रजातयो विद्यन्ते। तासां विविधस्थानेषु भिन्नाकारविशिष्ट आगारो दृश्यते। काचिदार्द्रमृत्तिकाया अधो वासानिर्माणं करोति, काचिद्वा शुष्कमृत्तिकाया उपरिभागे च। तासामुल्लेखार्हं वैशिष्टं यथा ता आगारनिर्माणकाले मुखात् तरलरूपं वर्ज्यं निःसृत्य मृत्तिकया काष्ठचूर्णेन सह वा मिश्रयति, टानेलाकृतेः निवासप्राकारे लेपयतीति वा।

पुनश्च यास्काचार्यविरचिते निरुक्तग्रन्थे दुग्धवाचकस्य पयस्–शब्दस्य क्षीरशब्दस्यापि निर्वचनं दृश्यते। तत्र पयसो वैशिष्टमुपयोगिता चालोचिते, यौ चार्वाचीनपरीक्षापर्यवेक्षणलब्धतत्त्वरुपेण ज्ञायेते।

**<u>पयः–</u>**

दुग्धवाचक–पयस्–शब्दस्य निर्वचनकरणावसरे यास्काचार्येण तस्य विरचिते निरुक्ते आह–

**पयः पिवतेर्वा प्यायतेर्वा।**[75]

अर्थात् पयस्–शब्दः 'पा'–धातोरुत 'प्याय्'–धातोः निष्पन्नः।

पानार्थकात् 'पा'–धातोरुत्पन्नस्य पयस्–शब्दस्य व्युत्पत्तिर्भवति– पीयते हि तदर्थाद् यस्य पानं संभवति। 'प्याय्'–धातुनिष्पन्नस्य पयस्–शब्दस्यार्थो भवति तेन हि वर्धन्ते प्राणिनः।

**<u>क्षीरम्–</u>**

दुग्धवाचकस्य पयस्–शब्दस्य समानार्थकः क्षीरशब्द इति। यास्काचार्येण क्षीरशब्दस्यापि निर्वचनं प्रदर्शितम्। तेनोक्तं यत्–

**क्षीरं क्षरतेर्घसेर्वेरो नामकरण उशीरमिति यथा।**[76]

अर्थात् क्षीरशब्दः 'क्षर्'–धातोरथवा 'घस्'–धातोः सृष्टः। उशीरमपि ईर–प्रत्ययनिष्पन्नमिति।

श्चोतनार्थकः क्षरणार्थको वा 'क्षर्'–धातुः ईर्–प्रत्ययश्च अन्योन्यसंयोगेन क्षीरशब्दं निष्पादयति। अथवा भोजनार्थकाद् 'घस्'–धातोरुत्तरम् ईर्–प्रत्यययोगात् क्षीरशब्दो निष्पन्नः। 'क्षर्'–धातोः सृष्टस्य क्षीरशब्दस्य व्युत्पत्तिः स्यात् श्चोतते क्षरति हि तदूधसः। 'घस्'–धातोरुत्पन्नस्य क्षीरस्य व्युत्पत्तिर्भवति अद्यते हि तत्।

पयस्–शब्दः क्षीरशब्दश्चेति दुग्धवाचकस्य शब्दद्वयस्य निर्वचनाद् दुग्धस्योत्पत्तिर्गुरुत्वं च ज्ञायेते। यतो हि दुग्धं(Milk) स्तन्यपायिप्राणिनां स्तनग्रन्थेः(Mammary Gland), निःसृतं शुक्लवर्णमयं तरलपदार्थमिति। स्तन्यपायिप्राणिनां शिशवः कठिनखाद्यग्रहनात् प्राग् मातृस्तनदुग्धं पिवन्ति। प्रसवादनन्तरं प्रथममातृस्तननिःसृतं दुग्धं

कोलोष्ट्रामिति(Colostrum) इति नाम्ना ज्ञायते। कोलोष्ट्रामस्थित–आन्टिवडि(Antibody) इति विविधरोगाक्रमनाद् रक्षति। दुग्धेऽस्मिन् प्रोटेइन्(Protein), ल्याक्तोज्(Lactose) इत्यादिपरिपोषकपदर्था अपि सन्ति, शिशूनां वृद्धौ पुष्टिसंपादने च उल्लेखार्हं गुरुत्वमस्ति। मनुष्यैरितरेषां स्तन्यपायिप्राणिनां दुग्धमपि पीयते। सर्वे परिपोषकपदार्था अस्मिन्विद्यन्ते, तेन दुग्धं सुषमख्याद्यमिति नाम्ना ज्ञायते। चिकित्साविद्याविषयक–गवेषणानुसारेण मांसपेशिवृद्धौ कठिनास्थिनिर्माणे च दुग्धस्योपयोगितास्ति।

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे मेघस्य उत्तमत्वप्रदर्शनकाले पर्जन्यादिभिर्देवताभिरोषधिसमूहाः पचन्तीति द्योतनार्थमुक्तं यत्–

**...पर्ज्जन्योवायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्त्यनूपा अनुवपन्ति लोकान् स्वेन स्वेन कर्म्मणा।**[77]

अत्र त्रय इति पदेन पर्ज्जन्न वायुरादित्य इत्यादीनां ग्रहनं भवति। ते पृथिवीं तपन्ति अर्थात्ते शीतोष्णवर्षैः ओषधीः पाचयन्ति। अनुपूवकाद् वप्–धातोरुत्तरं क्–प्रत्यययोगे अनूपशब्दः निष्पन्नः। तेन अनूपाशब्दस्यार्थोऽनुग्राहकाः। अतः ते स्वकर्मैः लोकाननुग्राहयन्ती।

पूर्वोक्तालोचनात् ज्ञायते यत् पर्ज्जन्योऽर्थादुदकं, वायुः, आदित्योऽर्थात् सूर्यारश्मिश्च ओषधीनामुद्भिदां वा बीजस्याङ्कुरोद्गमेऽत्यावश्यकोपादानरूपाः। न केवलमङ्कुरोद्गमे अपि च उद्भिदां विकाशे, पुष्पफलयुत्पादने तेषामुल्लेखार्हं गुरुत्वमस्तीति। अतो वक्तुं शक्यते यद् मतमिदं यथार्थरूपेण विज्ञानसंमतमिति।

******

## आकरनिर्देशः

---

[1] शा.च. (संपा.), ऋ.भा., पृ. १९९।

[2] तत्रैव।

[3] ठाकुरः (संपा.), नि. २/६/३, पृ. २२२।

[4] तदेव, ५/१४/८, पृ. ६४२।

[5] तदेव, ६/३/३, पृ. ६९९।

[6] ल.स्व. (संपा.), नि.भा. ६/३, पृ. ३९३।

[7] तत्रैव।

[8] तत्रैव।

[9] ठाकुरः (संपा.), नि. ६/२८/५, पृ. ७९६।

[10] तदेव, १/२/१/२७–२८, पृ. ४९।

[11] ज्ञा.शा. (संपा.), नि. भा. टी १/१।

[12] तत्रैव।

[13] ठाकुरः (संपा.), नि. ९/३२/३, पृ.१०५३।

[14] ठाकुरः (संपा.), नि. ३/१८/१२, पृ. ४३१।

[15] तदेव ३/१८/१३, पृ. ४३१।

[16] ल.स्व. (संपा.), नि. भा. ३/१८, पृ. १८३।

[17] ठाकुरः (संपा.), नि. ९/३/२, पृ. ९९५।

[18] तदेव २/२७/९, पृ. ३२४।

[19] तदेव ३/२८/११, पृ. ४३०।

[20] तदेव ६/२७/४, पृ. ७९२।

[21] तदेव २/७/३, पृ. २२८।

[22] तदेव ४/१८/५, पृ. ५२६।

[23] ज्ञा.शा. (संपा.), नि. ४/३, पृ. २२८।

[24] तत्रैव।

[25] ठाकुरः (संपा.), नि. ५/४/३, पृ. ५९८।

[26] ज्ञा.शा. (संपा.), नि. ५/४, पृ. २२१।

[27] तत्रैव।

[28] तत्रैव।

[29] ज्ञा.शा. (संपा.), नि. ५/१, पृ. २६८।

[30] ज्ञा.शा. (संपा.), नि. ५/४, पृ. २२१।

[31] ठाकुरः (संपा.), नि. ४/१३/७, पृ. ५०४।

[32] तदेव २/१७/४, पृ. २८२।

[33] तदेव ६/२६/६, पृ. ७८८।

[34] ल.स्व. (संपा.), नि. भा. ६/२६, पृ. ४७२।

[35] तत्रैव।

[36] ठाकुरः (संपा.), नि. ९/२२/१, पृ. १०३३।

[37] ज्ञा.शा. (संपा.), नि. ९/३, पृ. ४९५।

[38] ठाकुरः (संपा.), नि.९/५/३, पृ. ९९९।

[39] तदेव, १/५/११–१२, पृ. १०१–१०२।

[40] मु.श. (संपा.), नि. १/३, पृ. २८।

[41] ठाकुरः (संपा.), नि. ४/१३/५, पृ. ५०३।

[42] मु.श. (संपा.), नि. ४/२, पृ. १७३।

[43] ठाकुरः (संपा.), नि. २/२८/३, पृ. ३२७।

[44] मु.श. (संपा.), नि. २/७, पृ. १०६।

[45] ठाकुरः (संपा.), नि. २/५/१२, पृ. २१९।

[46] तदेव, ३/५/८, पृ.३५६।

[47] तदेव, १/२/५/३, पृ. ९७।

[48] तदेव ५/१/१७, पृ. ५८२।

[49] तदेव ६/३०/२, पृ. ८०२।

[50] मु.श. (संपा.), नि. ६/६, पृ. ३२९।

[51] तदेव ६/६, पृ. ३३०।

[52] ठाकुरः (संपा.), नि. ६/३०/३, पृ. ८०२।

[53] तदेव ६/१७/७, पृ. ७५३।

[54] ल.स्व. (संपा.), नि. भा. ६/१७, पृ. ४५०।

[55] ठाकुरः (संपा.), नि. १०/४१/२, पृ. ११५७।

[56] तदेव २/१९/५, पृ. २८९।

[57] तदेव १०/२३/४, पृ. ११२४।

[58] तदेव ४/२१/५, पृ. ५४३।

[59] ल.स्व. (संपा.), नि. भा. ४/२१, पृ. २६०।

[60] ठाकुरः (संपा.), नि. ४/२९/१६, पृ. ५३८।

[61] ल.स्व. (संपा.), नि. भा. ४/१९, पृ. २५७।

[62] ठाकुरः (संपा.), नि. १०/३९/४, पृ. ११५२।

[63] ज्ञा.शा. (संपा.), नि. १०/३९, पृ.४९१–४९२।

[64] मु.श. (संपा.), नि. १०/४, पृ. ४५८।

[65] ज्ञा.शा. (संपा.), नि. १०/३९, पृ. ४९२।

[66] ठाकुरः (संपा.), नि. ५/२/५/४, पृ. ९८।

[67] तत्रैव।

[68] तदेव ५/२६/१६, पृ. ६८३।

[69] ल.स्व. (संपा.), नि. भा. ५/२६, पृ. ३८०।

[70] ठाकुरः (संपा.), नि. ५/२६/१५, पृ. ६८२।

[71] ज्ञा.शा. (संपा.), नि. ५/४, पृ. ३१२।

[72] तदेव ६/१२/१४, पृ. ७३३।

[73] ल.स्व. (संपा.), नि. भा. ६/१२, पृ. ४२८।

[74] ठाकुरः (संपा.), नि. ३/२०/१५, पृ. ४४५।

[75] तदेव २/५/८, पृ. २१७।

[76] तदेव २/५/९, पृ. २१७।

[77] तदेव २/२२/५, पृ. ३०२।

# चतुर्थोऽध्यायः

## निरुक्तग्रन्थे भौगोलिक–तत्त्वानि

भूगोलशब्दस्य व्युत्पत्तिगतार्थो 'गोलाकार–पृथिवी'। भूशब्दः गोलशब्दश्च मिलित्वा भूगोलशब्दमुत्पादयति, यत्र भूशब्दस्यार्थः 'पृथिवी' पुनश्च गोलशब्दस्यार्थो 'गोलाकार' इति। 'जिओग्राफि'(Geography) इत्याङ्गलभाषया भूगोलशास्त्रस्य नामान्तरमिति। अत्रापि 'जिओ'(Geo), 'ग्रफिन्'(Graphein) इति ग्रीक्–शब्दयोः संयोगेन शब्दोऽयमुत्पद्यते। 'जिओ'(Geo) इत्युक्ते 'पृथिवी', 'ग्रफिन्'(Graphein) इत्यस्यार्थो 'लेखनम्' 'वर्णनम्' वा। तस्माद् 'जिओग्रफि'(Geography) इति शब्दस्यार्थो भवति 'पृथिव्या वर्णनम्' इति।

भूगोलशास्त्रं प्राकृतिकमानविकविषययोः समन्वयेनोत्पन्नमेकं विज्ञानशास्त्रम्, यन्मानवपरिवेशयोर्मध्ये संबन्धस्थापनेन मानवजातिमुन्नततरं जीवनं ददातीति। तद्दृष्ट्या भूगोलशास्त्रस्य विविधा उद्देश्याः सन्ति। ता यथा–

(१) भूगोलशास्त्रेण पृथिव्यान्तर्गतस्य विविधस्थानस्य सामग्रिक–वर्णनमिति।

(२) मनुष्यपरिवेशयोर्मध्ये संबन्धज्ञापनम्।

(३) सामाजिकार्थनैतिकानामुद्देश्यानां प्रयोगे सहायता प्रदानमिति।

(४) केनोपायेन भिन्नेषु विषयेषु समन्वयं भवति, तद्ज्ञापनमिति।

प्राथमिकदृष्ट्या भूगोलशास्त्रस्य(Geography) शाखाद्वयं विद्यते, तद्यथा– प्राकृतिक–भूगोलशास्त्रम्(Physical Geography), मानविक–भूगोलशास्त्रम्(Human Geography) च।

भूगोलस्य यस्यां शाखायां प्राकृतिकपरिवेशान्तर्गतस्य वस्तुन उत्पत्तिराकारविषयक–मालोचनमस्ति, सा प्राकृतिकभूगोलं वा फिजिओग्रफि(Physiography) इति नाम्ना ज्ञायते। अत्र वायुमण्डलं, वारिमण्डलं, जीवमण्डलं, भूपृष्ठ इत्यादीनां विषयानां वर्णनमस्ति। प्राकृतिकभूगोलस्योपशाखा अपि विद्यन्ते, यथा– 'जीव–भूविद्या'(Biogeography) ,

'समुद्रविज्ञानम्'(Oceanography), 'जलवायुसंक्रान्तविज्ञानम् आवहविद्या च'(Climatology & Meteorology), 'हाइड्रोलजि एन्ड् हाइड्रोग्रफि' इति।

भूगोलशास्त्रस्य यत्र मानवजातेः सामाजिक–राजनैतिक–अर्थनैतिक–सांस्कृतिकपरिवेशा–नामन्योन्यालोचनमस्ति, तन्मानविकभूगोलशास्त्रम्(Human Geography) इति। मानविकभूगोलशास्त्रमपि विविधासु शाखासु विभज्यते, यथा– 'सांस्कृतिक–भूगोलम्'(Cultural Geography), 'अर्थनैतिक–भूगोलम्'(Economic Geography), 'सामाजिक–भुगोलशास्त्रम्'(Social Geography), 'स्वास्थ्य–भूगोलम्'(Health Geography), 'राजनैतिक–भूगोलम्'(Political Geography) चेति।

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे वैदिकशब्दानां निर्वचनप्रदर्शनकाले संबन्धितमन्त्राणामपि व्याख्या कृता। तत्समये तेनानेकानि तत्त्वान्युल्लिखितानि, यानि भूगोलशास्त्रान्तर्गततत्त्वरूपेण ज्ञायन्ते। तानि यथा–

**नक्षत्रशब्दः–**

यास्काचार्यः ऋक्षः स्तृ इति शब्दद्वयं नक्षत्रवाचकरूपेणोक्तादनन्तं नक्षत्रशब्दस्य निर्वचनं प्रदर्शितम्। तत्रोक्तं यत्–

**नक्षत्राणि नक्षतेर्गतिकर्म्मणः** इति।[1]

अर्थाद् नक्षत्रशब्दः गत्यर्थकाद् 'नक्ष्'–धातोर्निष्पन्नः। गत्यर्थक–'नक्ष्'–धातोरुत्तरम् 'अत्रन्'–प्रत्यययोगेन नक्षत्रशब्दस्योत्पत्तिरर्थान्नक्षत्रं गतिशीलमिति।

पूर्वोक्तनिर्वचनाद् नक्षत्रं गतिविशिष्टमिति भौगोलिकतत्त्वं ज्ञायते। यतो हि, भौगोलिकतत्त्वानुसारेण मन्यते यद् नक्षत्रजगद् नीहारिका वा महाकाश एकत्रस्थितानि कोटयः कोटयो नक्षत्राणीति। नक्षत्रसमूहाः न केवलं स्व–अक्षाणां समन्ततः, पुनश्च छायापथस्यापि केन्द्राभिमुखं भ्रमन्ति। अतो निर्वचनमिदं भौगोलिकतत्त्वसमन्वितमिति।

**वातशब्दः–**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे वातशब्दस्य निर्वचनप्रसङ्गेणोक्तम्–

**वातो वातीति सतः।**[2]

अर्थाद्वातशब्दः कर्तृवाच्ये गत्यर्थकाद् वा–धातोर्निष्पन्नः। वातो वायुर्वा गच्छति।

यास्काचार्यकृतं वायुवाचकस्य वातशब्दस्य निर्वचनं यथार्थरूपेण भौगोलिकतत्त्वस्यानुरूपमिति। यतो भूवैज्ञानिकानां मतानुसारेण वायुमण्डलं पृथिवीमावृत्य छादयित्वा वा विराजते। भूपृष्ठस्योपरि प्रायेण दशसहस्रं किलोमिटर्यावत् वायुमण्डलं विस्तृतं भवति, तथाप्यधिकांशमेव भूपृष्ठाद् प्रायः सप्तविंशतिः किलोमिटर् पर्यन्तं तिष्ठति।

भूपृष्ठस्योपर्युन्मुक्तावस्थायां विराजमानत्वाद् वायुर्निश्चलः सुस्थितो वा न भवति, सर्वदैव चलमान भवतीति। तापस्य, वायुचापस्य च वैषम्यं, पृथिव्या आवर्तनमित्यादिहेतुत्वाद्वायुः सर्वदैव भूपृष्ठस्योपर्यानुभूमिकरूपेण प्रवहति। अतो वायुर्गच्छतीति यास्काचार्यस्य वचनं विज्ञानसंमतमिति।

गोशब्दः सूर्यरश्मिवाचक इत्यस्मिन् प्रसङ्गे यास्काचार्येण उक्तं यत्–

**अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते,**

**...आदित्यतोऽस्य दीप्तिर्भवतीति।**

**सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति।**

**सोऽपि गौरुच्यते।।**[3]

अस्य वचनस्यार्थो यथा सूर्यस्य रश्मिरेकः चन्द्रस्थितं भूत्वा दीप्यते, अतो आदित्याच्चन्द्रस्य दीप्तिर्भवति। प्रसङ्गेऽस्मिन्निरुक्तवृत्तिकारः दुर्गाचार्य उक्तवान्– **"एको रश्मिरादित्यस्य सुषुम्णो नाम चन्द्रमसं प्रत्यवस्थितो दीप्यते"** इति।[4] सुषुम्ण इति सूर्यरश्मेर्धारकश्चन्द्रेति वैदिकवाक्यमपि स्यात्। अयं सुषुम्णरश्मिर्गो इति शब्दस्य वाचको भवति।

गोशब्दः सुषुम्णनाम सूर्यरश्मेर्वाचक इत्यालोचनकाले यास्काचार्येण सौरजगतः विशेषमेकं तत्त्वमुपस्थापितम्, यच्च विज्ञानसंमतमिति। उक्तं यत् सौरजगति सूर्य एको नक्षत्रविशेषः। अस्य स्वकीयज्योतिरुष्णता चास्तः, किन्तु समन्ताद्भ्रमतां ग्रह–उपग्रह–ग्रहाणुपुञ्जानां

स्वदीप्तिर्तापश्च नास्तः। ते सूर्यालोकेनैव दीप्तिमयं भवन्ति। चन्द्रः पृथिव्या एकमेवमुपग्रहमिति। चन्द्रस्यापि स्वकीयज्योतिर्नास्ति, सूर्यालोकेनैवालोकमयं भवतीति।

**उषस्शब्दः–**

उषाशब्दस्य निर्वचनरूपेण यास्काचार्यः तस्य विरचिते निरुक्तशास्त्रे उक्तवान् यत्–

**उषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति।**[5]

अर्थादुषस्शब्दस्योत्पत्तिर्केनोपायेन, तस्योत्तररुपेणोक्तं उषा तमः विवासयतीति हेतुत्वादुषा इति नाम। उच्छतिशब्दः 'उच्छ्'–धातोर्निष्पन्नः। अत्र क्रियापदं कर्तृकारकेन सह युक्तत्वादुषस्शब्दः कर्तृवाच्यान्तर्गतप्रत्ययनिष्पन्नः। उषा रात्रेरुत्तरकालविशेषा इति।

अत उषस्शब्दस्य व्युत्पत्तिर्भवति विवासार्थकाद् 'उच्छ्'–धातोरुत्तरम् असिप्रत्ययनयोगे उषस्–शब्दस्योत्पत्तिः। उषा तमो नाशयति। पुनश्च रात्रेरुत्तरकालिकः समयोऽपि उषस् इति नामवाचकोऽर्थात्तस्मात्परं निशा नावशिष्यते इति।

यास्काचार्यकृतस्योषाशब्दस्य निर्वचनं भू–वैज्ञानिक दृश्ट्या यथार्थमिति। यतो हि, तेषां नये पृथिव्या आकृतिर्गोलाकारो न भूत्वा समतले सति आवर्तनस्य फलस्वरूपं केबलं दिवारात्री इति द्वयं स्यात्। यतो गोलाकारविशेषा, तस्मादत्र दिवारात्रयोर्विविधावस्था दृश्यन्ते। ता यथा– मध्याह्नः, सन्ध्या, मध्यरात्रिः, उषा, प्रभातः गोधूलिश्च। भिन्नाष्ववस्थासु पृथिव्यामालोकतापयोर्मध्ये भेदो लक्ष्यते। घूर्णनेन पृथिव्या योऽंशः तमसः समनन्तरमेवालोकितांशं गच्छति, तत्र प्रातः भवति। प्रातः इत्यस्मात् प्राक् कियत्क्षणं स्वल्पालोकविशिष्टः समय उषा(Dawn) इति नाम्ना ज्ञायते। अत उषः रात्रेरपरः कालोऽर्थाद् रात्रेरनन्तरमागतः कालविशेष इति। अनया उषया रात्रेर्गभीरान्धकारोऽपगतो भवति। अतो यास्काचार्यस्य मतमिदमाधुनिकविज्ञानभावनायामपि स्वीकृतम्।

**पृथिवी–**

यास्काचार्येण पृथिवीशब्दस्य व्युत्पत्तिरूपेण पूर्ववर्तिनो निरुक्तकारस्य शाकटायनस्य मतमुल्लिखितम्। तत्प्रसंङ्गे गार्ग्यमतानुसारिणो युक्तिः, शाकटायनपन्थिनः खण्डितयुक्तिरपि प्रदर्श्येते। उक्तं यत्–

**प्रथनात् पृथिवीत्याहुः क एनामप्रथयिष्यत् किमाधारश्चेति।**

**अथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः॥**[6]

अर्थाच्छाकटायनमतानुसारेण प्रथनत्वात्पृथिवी अर्थाद्विस्तारक्रियया सह संबन्धत्वादेव पृथिवी इति नाम। केन प्रथितम्? तस्याधार वा किमितिगार्ग्यपक्षस्य प्रश्नद्वयस्योत्तररूपेणोक्तं यदन्यैः प्रथिते सति यतः पृथिवी पृथुरूपेण विशालरूपेण वा दर्शिता, अतः पृथिव्याः पृथिवीत्वमिति। प्रसङ्गेऽस्मिन् निरुक्तवृत्तिकारेण दुर्गाचार्येणोक्तम्– **“न वयमेवं ब्रूमः प्रथितेयं केनचिदतः पृथिवीत्युच्यते।...यद्यप्यन्यैरप्रथिता तथापि पृथुदर्शनयोगात्तथोच्यत”** इति।[7] अपि चोक्तं भाष्यकारेण स्कन्दस्वामिना–**“प्रत्यक्षेण चेयं पृथुर्दृश्यते”**।[8]

निरुक्तकारेण शाकटायनकृतस्य पृथिवीशब्दस्य व्युत्पत्त्या महती पृथिवी इति भौगोलिकतत्त्वं ज्ञायते। अर्वाचीनवैज्ञानिकगवेषणानुसारेण पृथिव्याः परिधिः प्रायः चत्वारिंशत्सहस्रं किलोमिटर् इति, पुनश्च तस्या आयतनमुपरिपृष्ठस्य क्षेत्रफलं वा चतुःपञ्चाशत् लक्षमधिकमेकपञ्चाशत् कोटिः वर्गकिलोमिटर् इति। अतः पृथिवी सुदीर्घा विशालाकारविशिष्टा इति तत्त्वं विज्ञानसंमतमिति।

**समुद्रः–**

यास्काचार्येण तस्य विरचिते निरुक्तशास्त्रे समुद्रशब्दस्य या व्युत्पत्तिः कृता सा भवति–

**समुद्द्रवन्त्यस्मादापः समभिर्द्रवन्त्येनमापः संमोदन्तेऽस्मिन् भूतानि समुदको भवति समुनत्तीति वा।**[9]

अत्र दृश्यते यदाचार्येण समुद्रशब्दस्य व्युत्पत्तिपञ्चकमुल्लिखितम्, यद् जलराशिरन्तरिक्षयोर्वाचकमिति। प्रथमनिर्वचनं यथा– ‘समुद्द्रवन्ति(सम्यग् ऊर्ध्वं गच्छन्ति) आपः अस्मात्’ अर्थाद्यस्मादुदकं सम्यग्रूपेण ऊर्ध्वं गच्छति, सः समुद्रः;

जलराशिरूपसमुद्रादुदकानि स्वेदरूपेण सूर्यरश्मिं प्रत्याकृष्य भवन्त ऊर्ध्वमुत्तिष्ठन्ति, अन्तरिक्षरूपसमुद्रादपि धूम्ररूपजलराशिः वायुप्रवाहेन ऊर्ध्वगमनं करोति। भाष्यकारः स्कन्दस्वामी प्रसङ्गेऽस्मिन् उक्तवान् यत्–**" समुद्+दु+ड (अपादाने); संहता ऊर्ध्वं द्रवन्ति अस्मादापः अन्तरिक्षात् पार्थिवाच्च रश्मिभिराकृष्यमाणा वायुना प्रेर्य्यमाणा"**।[10]

द्वितीयनिर्वचनयुक्तं यत्– 'समभिद्रवन्त्येनमापः'–अर्थाद्यस्याभिमुखमापो धावन्ति; भूपृष्ठान्नीचैः स्थितत्वात् सागराभिमुखं पृथिव्या जलराशिर्धावति। स्वेदरूपं जलं सूर्यरश्मिनान्तरिक्षं प्रति गच्छतीति।

'संमोदन्ते अस्मिन् भूतानि'– इति तृतीयनिर्वचनस्यार्थो भवति यत्र प्राणिसमूहः हृष्टं भवति; समुद्रे तथान्तरिक्षे निवसन्तः प्राणिनः तत्रैव प्रमुदन्ति, नान्यत्रेति। स्कन्दस्वामिन उक्तिर्यथा– **सम्+मुद+रक्; संमोदन्तेऽस्मिन् जलचराणि भूतानि, इतरत्रान्तरिक्षचराणि**।[11]

समुदको भवति इति चतुर्थनिर्वचनानुसारेण अर्थो जायते– यत्रापः संहतरूपेणैकत्र वा वर्त्तन्ते; समुद्रे जलराशिः उदकरूपेण पुनश्चान्तरिक्षरूपसमुद्रे धूम्ररूपेणैव विद्यते। स्कन्दस्वामिनो नये समुद्रशब्दस्य व्युत्पत्तिर्भवति–**" सम्+उदक+र(मत्वर्थे); समेकीभावे"** इति।[12]

पञ्चमनिर्वचनं यथा–समुनत्ति(संक्लेदयति) इति। यः क्लेदयति उदकेन सेचयतीति वा; आप–रूपसमुद्रः स्वभावात् पुनश्चान्तरिक्षरूपः समुद्रः वर्षणक्रियया पृथिवीं क्लेदयति। भाष्यकारस्य स्कन्दस्वामिन मते– **"सम्+उदी(क्लेदने)+रक्; एको लीलया भुवनं क्लेदयति अपरो वर्षण"**।[13]

यास्काचार्यकृताद् जलराशिवाचकसमुद्रशब्दस्य व्युत्पत्तेः समुद्रविषयकं भौगोलिकतत्त्वमस्माभिर्ज्ञायते। यथा– समुद्र उदकानां समाहारः, भूपृष्ठादुदकराशिः समुद्रं प्रति गच्छति, सूर्यरश्मिभिराकृष्यमानं भूत्वा जलराशिः समुद्राद्र्ध्वमुत्तिष्ठति, समुद्रः जलजप्राणिनां निवास इति, समुद्रः तस्य जलेन सर्वं वस्तु सिक्तं करोति इत्यादयः।

**<u>मेघः–</u>**

निरुक्तमिति निर्वचनशास्त्रे आचार्येण यास्केन मेघशब्दस्य व्युत्पत्तिप्रसङ्गे उक्तम्–

**मेघः कस्मान्मेहतीति सतः।**[14]

तेन प्रश्नोत्तररूपेण मेघशब्दस्य व्युत्पत्तिः प्रदर्शिता। उक्तं यत्–कस्माद् मेघ इति नाम, तस्योत्तरं प्रदत्तवान् यतः मेहति सिंचति वा ततो मेघ इति। 'मिह्'–धातोर्निष्पन्नं मेहतीति क्रियापदम्। मेहतीति क्रियापदं कर्तृकारकेन सह युक्तत्वाद् मेघशब्दोऽत्र कर्तरि मिह्–धातोरुत्तरं घञ्–प्रत्यययोगे व्युत्पन्नः। अत्र 'मिह्'–धातुः सेचनार्थकः, अतो मेह=मेघ इति। मेघ उदकं सिंचतीति।

यास्काचार्यकृताद् मेघशब्दस्य व्युत्पत्तेर्वर्षणस्य हेतुस्वरूपो मेघोऽर्थान्मेघाद्वृष्टिर्भवतीति भौगोलिक–विषयो ज्ञायते। दिवा सूर्यरश्मेः तापेन नदी–ह्रद–समुद्रानां जलाशयानामुदकम् अपि च पृथिव्याः शीतलतमांशे स्थितः तुषारः स्वेदरूपेण वायुमाश्रित्य उर्ध्वगगनमुत्तिष्ठतः। तत्र स्वेदरूपं जलं शीतलवातेन सह मिलित्वा क्षुद्रजलकणारूपं प्राप्नोति। ततः वायुस्थितं रजमाश्रित्य वायुमण्डले तिष्ठति। वायवस्थितः भासमानोऽयं क्षुद्रजलकणासमूहः मेघ इति नाम्ना ज्ञायते। अयं मेघः अत्यन्ते हिमे प्राप्ते पृथिव्या अभिकर्षबलेन अधः पतति, तदा वर्षणं भवति। यद्यपि सर्वस्मान्मेघाद्वृष्टिर्न भवति, तथाप्यधिकांशमेघादेव संभवति। यथा– अल्टोकुमुलास्(Alto-Cumulus) अल्टोस्ट्राटास्(Alto-Stratus) स्ट्राटास्(Stratus) निम्वास्(Nimvus) कुमुलो–निम्वास्(Cumulo-Nimvus) इत्यादिमेघाः सन्ति येभ्यो वृष्टिर्भवति। किंच अत्यधिकवर्षणप्रदानाद् निम्वासमेघः वर्षणमेघ इति नाम्ना ज्ञायते। अतो वक्तुं शक्यते यत् मेघाद्वृष्टिर्भवति, मतमिदं विज्ञानसंमतमिति।

**उपरुपलौ शब्दौ–**

यास्काचार्येण निरुक्तशास्त्रे उपर–उपल इति शब्दद्वयस्य व्युत्पत्तिर्कृता यत्–

**उपर उपलो मेघो भवत्युपरमन्तेऽस्मिन्नभ्राण्युपरता आप इति वा।**[15]

अर्थादुपर उपलश्च शब्दौ मेघवाचकौ पर्वतवाचकौ च भवतः। अस्मिन् मेघा विश्रान्ताः आपोऽपिश्च इति शब्दद्वयस्य निर्वचनम्।

उप इत्युपसर्गपूर्वकाद् रम्–धातो उपर उपलश्च शब्दद्वयस्योत्पत्तिः। शब्दयोर्मध्ये केवलं रलयोर्भेदः। शब्दद्वयेन पर्वतमेघौ द्योत्येते। मेघः भवति इत्युक्ते मेघोऽपि भवतीति। पर्वतपक्षे व्युत्पत्तिर्यथा अत्राभ्राणि विश्रान्तानि, पुनश्च मेघरूपेण व्युतत्तिर्भवत्यस्मिन्नुदकानि विश्रान्तानीति।

निर्वचद्वयाद् द्वौ भौगोलिकतत्त्वे ज्ञायेते, यथा उपरशब्दस्य निर्वचनाद् बोद्ध्यते यत् मेघे आप उपरतं भवन्तीति तु भूगोलविदा स्वीकृतम्, पुनश्च उपलशब्दस्य निर्वचनाद् शैलोत्क्षेपवर्षणमभिव्यञ्जितम्। यतो हि भूगोलशास्त्राणुसारेण शैलोत्क्षेपवृष्टौ मेघाः पर्वते एव उपरमन्ते। समुद्राद् घर्मयुक्तः वायुः निम्नचापविशिष्टांशाभिमुखं गमनकाले केनचिदुन्नतपर्वतेन वाधितं भूत्वा पर्वतस्युपरि गत्वा घनीभवनेन मेघरूपं प्राप्नोति,ततो वृष्टिरूपेण तत्रैव तस्य क्षेपनं भवति, वर्षणमिदं शैलोत्क्षेपवर्षणमित्युच्यते। अत उपलशब्दस्य निर्वचनमपि भौगोलिकतत्त्वसमन्वितमिति।

<u>**सिन्धुशब्दः–**</u>

यास्काचार्यः नद्यर्थकस्य सिन्धुशब्दस्य निर्वचनमुक्तवान् तस्य विरचिते निरुक्तग्रन्थे। प्रसङ्गेऽस्मिन् तेन द्वयं निर्वचनं प्रदर्शितम्, उक्तं यत्–

**सिन्धुः स्रवणात्**[16] पुनश्चोक्तं– **सिन्धुः स्यन्दनात्** चेति।[17]

अर्थात् प्रथमनिर्वचनानुसारेण सिन्धुशब्दः 'स्रु'–धातोर्निष्पन्नः। गत्यर्थकात् 'स्रु'–धातोः सिन्धुशब्दस्योत्पत्तिः, सिन्धुरर्थाद् नदी स्रुतं भवति प्रवहति वा। द्वितीयनिर्वचनानुसारेण 'स्यन्द्'–धातोः सिन्धुशब्दस्य निष्पत्तिः। अत्र 'स्यन्द्'–धातुः प्रस्रवणार्थकः, अर्थात् सिन्धु इत्युक्ते नदी पर्वताद् निस्यन्दितं भवति प्रस्रुतं भवतीति वा। प्रसङ्गेऽस्मिन् स्कन्दस्वामिनोक्तं**–" पर्वतस्यन्दात्"** इति।[18] सिन्धुरविरतधारया प्रवहति।

पूर्वोक्तस्य सिन्धुशब्दस्य निर्वचनद्वयात् नद्यारुत्पत्तिर्गतिश्च ज्ञायेते। भूगोलविदां मतानुसारेण पार्वत्यप्रदेशे क्षुद्रजलधारासमूह इतरेतरसंयोगेन बृहद्जलधारारूपेण पृथिव्या आकर्षणेन ऊर्ध्वस्थानादधो निरन्तरधारया प्रवहति, इयं प्रवहमाणा जलधारा नदी नाम्ना ज्ञायते। अतः

सिन्धुरर्थाद् नदी पर्वतादुत्सृज्य निरविच्छिन्नगत्या वहतीति निरुक्तकारस्य मतमिदमद्यतनीयभौगोलिकभावनाया बीजभूतमिति वक्तुं शक्यते।

**<u>अप्–शब्दः–</u>**

निरुक्तकारेण नदीवाचकसिन्धुशब्दस्य निर्वचनादनन्तरमुदकवाचका अप्–शब्दस्य निर्वचनं प्रदर्शितम्। तेनोक्तं यत्–

**आप आप्नोते** इति।[19]

अर्थाद् अप्–शब्द 'आप्'–धातोर्निशपन्नः।

व्याप्तार्थकादथवा प्राप्त्यार्थकाद् 'आप्'–धातोरप् इति शब्दस्य निष्पत्तिः। अप्–शब्दः स्त्रीलिङ्गवाचको नित्यबहुवचनान्तश्च(प्रथमाया एकवचनम् आपः)। अप्–शब्द उदकार्थकः। उदकेनैव सर्वं परिव्याप्तमथवा सर्वत्रैवोदकं प्राप्यते(आप्यते प्राप्यते सर्वत्र)। व्याप्तार्थकस्य 'आप्'–धातोर्निष्पन्नस्य अप्–शब्दस्य प्रसङ्गे स्कन्दस्वामिनोक्तं यत्– **"कृत्स्नं ताभिर्व्याप्तम्"**।[20]

यास्काचार्यकृतम् अप्–शब्दस्य निर्वचनं भौगोलिकतत्त्वसमन्वितम्। यतो हि, भूविज्ञानस्य मतानुसरेण सौरजगति केवलं पृथिव्यामेव जलं प्राप्यते, कुत्रचिद्वा न। पृथिव्यां यान्युदकानि सन्ति, तेषु सप्तनवतिशतांशः समुद्र एवे तिष्ठन्ति, अतिरिक्तं भागत्रयमस्ति नदी–जलाशय–ह्रद–हिमवाह–भूनिम्नस्थादिष्वंशेषु। पुनश्च मन्यते यत् पृथिवीं चतुर्धा विभक्ते कृते चतुरांशरूपेण विभक्त्या भागमेकं स्थलमपि चापरभागत्रयमुदकयुक्तमिति भवति। अतो न केवलं जलभागे स्थलभागेऽपि भूनिम्नस्थरूपेण जलं विद्यमानम्। तस्माद् जलं सर्वत्र व्याप्तम् वा सर्वत्रैव जलं प्राप्यते इति यास्काचार्यस्य मतं विज्ञानसंमतमिति।

**<u>यमुनाशब्दः–</u>**

यमुनाशब्दस्य निर्वचनप्रसङ्गेण यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे उक्तं यत्–

**यमुना प्रयुवती गच्छतीति वा प्रवियुतं गच्छतीति वा**।[21]

अर्थाद् यमुनानदीतरनद्या सहात्मानं मिलित्वा गच्छति वा स्वातन्त्रेण पृथग्रूपेण गच्छतीति।

मिश्रणार्थक–यु–धातोः यमुनाशब्दस्य सृष्टिः, यवना इत्यस्माद् यमुना इति। प्रथमनिर्वचनयुक्तं यत् यमुनानदी अपरनदीमुपतिष्ठते अर्थात् स्वकीयोदकेनान्यनद्या सह मिलित्वा गच्छतीति। द्वितीयनिर्वचन उक्तं यद् भिन्ननद्या सह मिलिते सति कृष्णवर्णविशिष्टत्वात् स्वतन्त्रा इवावगम्यते। प्रवियुतमिति शब्दस्यार्थप्रसङ्गे दुर्गाचार्यस्योक्तिर्यथा **"स्तिमितमिव"** इति।[22]

यमुनानदीवाचकस्य यमुनाशब्दस्य प्रथमा व्युत्पत्तिर्यथार्थरूपेण भौगोलिकतत्त्वसमन्विता। यमुनानदी भारतवर्षस्य मुख्यनदीं गङ्गां संगच्छतीति। गङ्गानद्याः प्रधानोपनदी यमुना अस्ति। यमुनानदी हिमालयपर्वतान्तर्गताद् यमुनोत्रीहिमशैलादुत्पन्नं भूत्वा प्रायः षट्सप्तत्यधिकं त्रयोदशशतं किलोमिटर् इति मार्गमतिक्रम्य ईलाहावाद नाम नगरे त्रिवेणी–सङ्गमित्यत्र गङ्गां संगच्छतीति। अतो मिश्रणार्थकाद् युधातोर्निष्पन्नस्य यमुनाशब्दस्य निर्वचनं विज्ञानसंमतमिति।

**<u>गङ्गाशब्दः–</u>**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे गङ्गानदीवाचकस्य गङ्गाशब्दस्य निर्वचनं प्रदर्शितम्। उक्तं यत्–

**गङ्गा गमनात्** इति।[23]

अर्थाद् गङ्गाशब्दः गम्–धातोर्निष्पन्नः। गङ्गा विशिष्टगतिसंपन्ना, प्राणिनां विशिष्टगतिविधानकारका वा।

निर्वचनादस्मात् गङ्गानद्या गतिः गुरुत्वंचेति विषयद्वयं ज्ञायते। भारतवर्षस्य प्रधाना नदी गङ्गा विशिष्टगतिसंपन्ना इति। यतो हि तस्या उच्च–मध्य–निम्नादयो गतयो सुस्पष्टरूपेण विद्यते, तस्माद्गङ्गादर्शनदी इति। भारतवर्षे अस्या नद्या दैर्घ्यं दशाधिकं पञ्चविंशतिशतं किलोमिटर् इति। गङ्गोत्रीति हिमवाहात् हरिद्वारपर्यन्तं उच्चगतिः पार्वत्यगतिर्वा। अस्या गतेर्दैर्घ्यं विंशत्यधिकं त्रिशतमिति। हरिद्वारतः राजमहलपर्वतं यावत् मध्यगतिः, पुनश्च तस्मात् स्थानाद् वङ्गोपसागरपर्यन्तं गङ्गाया निम्नगतिर्व–द्वीपप्रवाह इति।

गङ्गानदी प्राणिवर्गस्य विशेषगतिविधानं करोतीति यास्काचार्यस्योक्तिरियं भौगोलिकतत्त्वसमन्विता। तस्य कारणं यथा– गङ्गानदी कुमायुनहिमालयस्थितस्य गोमुखगुहाया गङ्गोत्रीहिमवतः सृष्ट्वा वङ्गोपसागरं संगच्छतीति। इयं नदी भारत–वङ्गदेशयोरन्तःसंचारिणी इति। अस्यां नद्यां सर्वदैवोदकानि सन्ति। भारतवर्षस्य प्रवहमाणानामुदकानां चतुर्दशशतांशा गङ्गानद्यामेव प्रवहन्ति। भारतवर्षे आगमिदिवसकृते संचितानां तडितां षड्विंशतिशतांशा अस्यां नद्यववाहिकायामेव संचिता इति। नद्या उपकूलप्रदेशे उर्वरा उत्पादनक्षमा वा मृत्तिका विद्यते। भारत–वङ्गदेशयोर्कृषिप्रधान अर्थनीत्यां अस्या मृत्तिकाया गुरुत्वमस्ति। उपनद्या सह गङ्गाया आप उत्तरभारतवर्षस्य गृहस्थ–कृषिकार्य–शिल्पकर्मणामत्यावश्यकानामुदकानां मुख्या आश्रयाः। सदा वारिपूर्णत्वादियं नदी जलजप्राणिनां निर्भयाश्रयेति। गवेषकानां मतानुसारेण प्रायः चत्वारिंशत्यधिकं शतं प्रजातयः मत्स्याः तस्यां निवसन्तीति। तान् शिकारं कृत्वा धीवरेण जीव्यते। पुनश्चनेकानि तीर्थक्षेत्राणि गङ्गानद्याः कूले अवस्थाप्यन्ते, यानि पुण्यार्थिनां मूलान्याकर्षणक्षेत्राणि। किंच अस्या नद्याः तीरवर्तिनि प्रदेशे प्रतिद्वादशवर्षादनन्तरं कुम्भमेला नाम सम्मेलनमनुष्ठीयते, यच्च विविधप्रदेशादागतानां भ्रमणार्थिनां मिलनस्थलमिति मन्यते। अतो वक्तुं शक्यते यद् गङ्गानदीवाचकस्य गङ्गाशब्दस्य निर्वचनमर्वाचीनभौगोलिकभावनाया आधारस्वरूपमिति।

**शुतुद्री–**

निरुक्तशास्त्रे यास्काचार्यः नदीं प्रति स्तुतिकाले नदीवाचकशब्दानामपि व्युत्पत्तिः प्रदर्शिता। तत्र शुतुद्रीशब्दस्य या व्युत्पत्तिर्कृता, ता यथा–

**शुतुद्री शुद्राविणी क्षिप्रदाविणी, आशु तुन्नेव द्रवतीति वा।**[24]

अत्र शुतुद्री इत्यतः शुद्राविणी इत्यस्मात् क्षिप्रदाविणी, क्षिप्रगतिर्विशिष्टा इति अथवा व्यथितं भूत्वा द्रुतं गच्छन्निव।

शु आशुः क्षिप्र इत्यादयः शब्दा एकार्थकाः। शुशब्दपूर्वको द्रुधातुर्द्वित्वे प्राप्ते शुतुद्रीशब्दस्य सृष्टिर्भवति; शुद्रुदीशब्दात् शुतुद्रीति। शुतुद्री इत्युक्ते शुद्राविणी क्षिप्रद्राविणी वा द्योत्यते।

पुनश्च आश्चर्थकः श्रुशब्दः व्यथनार्थकः तुद्–धातुर्गत्यर्थको द्रुधातुश्च मिलित्वा शुतुद्रीशब्दं निष्पादयति; अस्यार्थो यथा बिद्धं भूत्वा गच्छतीव।

यास्काचार्यकृतस्य शुतुद्रीशब्दस्य प्रथमनिर्वचनाच्छुतुद्रीनद्या वैशिष्टमेकं ज्ञायते, यच्च भूविज्ञानसंमतमिति। शुतुद्रीनदी तिब्बतप्रदेशस्य मानससरसोऽन्तर्गताद् राक्षसताल नाम ह्रदादुत्पद्य दीर्घमार्गमतिक्रम्य पाकिस्तानप्रदेशे सिन्धुनद्या सह मिलिता। पार्वत्यप्रदेशे विराजितत्वादियं नदी क्षिप्रगतिविशिष्टा। नद्या जलराशेः क्षिप्रप्रवाहेन विविधा जलविद्युत्–प्रकल्पाः स्थापयन्ति। यथा 1000MW (Bhakra Dam), 1000MW Karcham Wangtoo Hydroelectric Plant, इति।

**<u>रात्रिः–</u>**

आचार्यो यास्क निरुक्तमित्यत्र रात्रिशब्दस्य निर्वचनप्रसङ्गे उक्तवान् यत्–

**रात्रिः कस्मात् प्ररमयति भूतानि नक्तंचारीण्युपरमयतीतराणि ध्रुवोकरोति, रातेर्वा स्याद्दानकर्म्मणः प्रदीयन्तेऽस्यामवश्यायाः** इति।[25]

आचार्येण प्रश्नोत्तररीत्या रात्रिशब्दस्य निर्वचनं कृतम्। कस्माद् रात्रिनामस्योत्पत्ति इति प्रश्नस्योत्तररूपेणोक्तं यत्– या नक्तंचारीणि भूतानि प्ररमयति, इतराणि भूतानि स्थिरीकरोति अथवा दानार्थकाद् राधातोर्वा रात्रिशब्दस्य निष्पत्तिः,रात्रौ शिशिरं प्रदत्ते।

अत्र रात्रिनामस्य व्युत्पत्तिः प्रदर्श्यते। प्रथमनिर्वचनानुसारेण रात्रिः तस्कर–उलूक–पिशाचादयो निशाचराः प्राणिनः प्रमुदन्ति; (प्र)रामयित्री=रात्रि। रात्र्या दिवाचारिणां प्राणिनां कर्मविरतिः संपद्यते, रात्रौ प्राणी कार्याद्विरमतीति; (उप)रामयित्री=रात्रि। द्वितीयानुसारेणोक्तं यद् दानार्थकाद् राधातोरुत्तरं त्रिप्–प्रत्यययोगेन रात्रिशब्दो निष्पन्नः; रात्रावेव भूमा अवश्या दृश्यन्ते।

यास्काचार्यकृतादन्तिमनिर्वचनाद् रात्रावेव भूमौ अवश्याः दृश्यन्ते इति भौगोलिकतत्त्वं ज्ञायते। यतो हि उक्तं यत् रात्रौ भूपृष्ठे अनुष्णे प्राप्ते वायुस्थिताः घर्माः तंनिकषागम्य हिमवन्तो भवन्ति। ततः क्षुद्रजलविन्दुरूपेण भूपृष्ठस्थितेषु तृणपत्रादिषु स्थीयन्ते। ता अवश्या

इति नाम्ना ज्ञायन्ते। अतो यथार्थरूपेणैव निर्वचनमिदमद्यतनीयभौगोलिकभावनाया आधारस्वरूपमिति।

पुनश्च यास्काचार्येण रात्रिवाचकनक्ता इति शब्दस्यापि निर्वचनं कृतम्। प्रसङ्गेऽस्मिन्नुक्तं यत्–

**नक्तेति रात्रिनामानक्ति भूतान्यवश्यायेनापि वा–ऽनक्ताऽव्यक्तवर्णा** इति।[26]

नक्ता इति शब्दस्यार्थो रात्रीति; या नीहारेण प्राणिनः सिक्तं क्लिन्नं वा करोति, दुर्गाचार्येण प्रसङ्गेऽस्मिन्नुक्तम्– **"अनक्ति क्लेदयति"** इति।[27] रात्र्यनभिव्यक्तरूपविशिष्टेति वा।

रात्रिवाचकस्य नक्ताशब्दस्य निर्वचनद्वयं प्रदर्शितम्। प्रथमानुसारेण अञ्ज्+क्त=न+अज्+त=नक्ता, रात्र्यवश्यायेन भूतानि क्लेदयति। द्वितीयानुसारेणोक्तं यदत्र 'न' इति प्रतिषेधार्थे प्रयुक्तम्, न+अक्ता(व्यक्ता)= नक्ता। दिवसो यथा व्यक्तरूपविशिष्टः, न रात्रिस्तथा, अर्थाद्रात्रेः किमपि रूपं नास्ति, रात्रिः तमसावृता भवतीति।

पूर्वोक्तरात्रिवाचकनक्ताशब्दस्य द्वितीयनिर्वचनाद्रात्रिः तमसाच्छन्ना भवतीति भौगोलिकज्ञानं जायते। पृथिव्या आह्निकगत्याः फलस्वरूपं योऽंशः सूर्याभिमुखं स्यात् तत्र दिवा भवति, पुनश्च तस्मादपरप्रदेशो यत्र सूर्यरश्मिर्न गच्छति तत्र रात्रिर्विराजते। अतो रात्रिर्दिवसवन्न व्यक्तवर्णविशिष्टा, सानभिव्यक्तरूपविशिष्टेति।

**चन्द्रशब्दः–**

चन्द्रशब्दस्य निर्वचनं कृतं यास्काचार्येण यत्–

**चन्द्रश्चन्दतेः कान्तिकर्म्मणः** इति।[28]

अर्थाच्चन्द्रशब्दः कान्त्यर्थकात् 'चन्द्'–धातोर्निष्पन्नः। चन्द्रः नित्यकान्तः, नित्यशोऽभीप्सितो वा।

चन्द्रशब्दस्यापरनिर्वचनं यथा–

**चारु द्रमति, चिरं द्रमति चमेर्वा पूर्वम्** इति।[29]

अत्र ज्ञायते यत् चारुशब्दः 'द्रम्'-धातुश्च मिलित्वा चन्द्रशब्दः व्युत्पन्नः; चन्द्रः चारुणा गच्छतीति। अपि च, चिर+ द्रम्-धातोः चन्द्रशब्दस्य सृष्टिः; चन्द्रः मन्दगतिविशिष्टत्वाद् दीर्घकालं यावद् द्रमति गच्छतीति वा। अथवा चम्यमानशब्दः 'द्रम्'-धातुश्चान्योन्यसंयोगेन चन्द्रशब्दं निष्पादयतीति। चम्यमानशब्दः भक्षणार्थकात् 'चम्'-धातोः चम्यमानशब्दस्योत्पत्तिः। चन्द्रः देवैर्रश्मिसमूहैर्वा भक्ष्यमानं भूत्वा व्योम्नि सरतीति।

**<u>चन्द्रमा-</u>**

यास्काचार्येण चन्द्रमाशब्दस्य व्युत्पत्तिरूपेणोक्तं-

**चन्द्रमाश्चायन् द्रमति, चन्द्रो माता चान्द्रं मानमस्येति वा।**[30]

अत्र चन्द्रमाशब्दस्य निर्वचनत्रयं प्रदर्शितम्। प्रथमनिर्वचनं यथा- दर्शनार्थकचाय्-धातोरुत्तरं शतृप्रत्ययान्तपदं, गत्यर्थकः 'द्रम्'-धातुश्च मिलित्वा चन्द्रमस्-शब्दस्योत्पत्तिः, चायन्द्रमस्=चन्द्रमस्, चन्द्रमा उपरिस्थितं भूत्वा लोकपालत्वनिबन्धाद् भूतसमूहान् पश्यन् गच्छतीति। द्वितीयनिर्वचनानुसारेण चन्द्रो माता च शब्दद्वयस्य संयोगेनोत्पन्ना चन्द्रमा, चन्द्रमा सर्वदा ईप्सिता भवति, अपि च माता इत्युक्ते मासादिकालानां निर्माता इति। तृतीयनिर्वचनं यथा- चान्द्रः माता इति शब्दद्वयं मिलित्वा जाता चन्द्रमा, मासादिकालस्य निर्माता चन्द्रमेति।

पूर्वोक्तनिर्वचनद्वयात् चन्द्रस्य कानिचित् वैशिष्टानि ज्ञायन्ते, यानि भूगोलशास्त्रस्य तत्त्वानीति। तानि यथा- चन्द्रः पृथिव्या एक उपग्रहविशेषः। स्वाक्षतः समन्तात् घुर्णन् चन्द्रः पृथिवीमपि परिक्रमनं करोति। तस्यैकस्य परिक्रमनस्य समयकालः प्रायः अष्टाविंशति दिवसा इति। समयोऽयं चान्द्रमास इति नाम्नाभिधीयते। इदानीं त्रिंशत्दिवसेषु एको मास इति मन्यते, तथापि कदाचित् एकत्रिंशत् अष्टाविंशति वा दिवसेष्वपि एकस्य मासस्य ग्रहणं स्यात्। अतः चन्द्रो मासादिकालस्य प्रणेता इति यथार्थम्। चन्द्रस्य स्वस्याक्षस्य समन्ततः सकृद् घूर्णनस्य समयाः अष्टाविंशतिदिवसाः, परन्तु पृथिव्या आह्निकगत्याः समयकालः चतुर्विंशतिर्होराः। अतो वक्तुं शक्यते यत् चद्रः मन्दगतिसंपन्न इति। चन्द्रस्य स्वदीप्तिर्नास्ति, सूर्यरश्मिभिः सो ज्योतिष्मान् भवति। पृथिव्यपेक्षया सूर्यस्य निकषावस्थानकाले चन्द्र

उज्ज्वलतररूपेण प्रतिभाति, किन्तु क्रमेण सूर्याद्दूरेण स्थिते सति तस्याकारस्य परिवर्त्तनं दृश्यते। एकैकशः दिनेषु तस्याकारोऽपक्षीयते वर्धतेर्वा। एवं प्रकारेण सः पूर्णेन्दु इत्यस्मादवस्थात् बालेन्दु इति रूपमाप्नोति। अतः चन्द्रः देवताभि इत्युक्ते सूर्यरश्मिभिर्भक्ष्यमानं भूत्वा व्योम्नि सरतीत्युक्तिरपि विज्ञानसंमतेति।

**<u>आदित्यः–</u>**

आदित्यशब्दस्य निर्वचनरूपेण यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे उक्तम्–

**आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादितेः पुत्र इति वा।**[31]

कस्मादादित्यशब्दस्योत्पत्तिः, तस्योत्तरप्रदानकालयुक्तं यत्– यो रसानादत्ते, ज्योतिष्मानां पदार्थानां ज्योतिमादत्ते अथवा यो भासा दीप्तो भवति अथवा देवमातुरदितेः पुत्र इति व्युत्पत्तिरादित्यशब्दस्य।

अतो दृश्यते यद्, आदित्यशब्दस्य निर्वचनत्रयमत्र प्रदर्शितम्। प्रथमानुसारेण आ इत्युपसर्गपूर्वकाद् 'दा'–धातोरादित्यशब्दस्य निष्पत्तिः; आ इत्युपसर्गपूर्वकाद् दाधातोरर्थः ग्रहणं करोति गृह्णातीति वा। आदित्यः स्वकीयरश्मिभिर्भौमरसानादत्ते, चन्द्रनक्षत्राणां ज्योतिष्मतां पदार्थानां ज्योतिमपि स आदत्ते। तस्योदयेन चन्द्रादिनक्षत्राणां प्रभानाशो भवति। वृत्तिकारो दुर्गाचार्य उक्तवान्– **"तदुदये हि चन्द्रादीनां प्रभानाशो भवति"** इति।[32] भाष्यकारस्य स्कन्दस्वामिन उक्तिर्यथा–**" तदुदयेऽन्तर्धानादादानव्यपदेशः"** इति।[33] द्वितीयनिर्वचनस्यार्थो भवति– आ इत्युपसर्गपूर्वकाद् 'दीप्'–धातोरादित्यशब्दस्योत्पत्तिः, आ इत्युपसर्गेन सह संयोगस्य दीप्–धातोरर्थप्रसङ्गे वृत्तिकारस्य दुर्गाचार्यस्योक्तिर्यथा– **"आदीप्त आवृतो भवति"** इति।[34] यद्यपि स्कन्दस्वमिनो मतेन आ+दीप्–धातोरर्थो आदीप्त इति; आदित्यः स्वदीप्त्या दीप्तिमान् भवति, स्वदीप्त्या इतरदीप्तिमतः पदार्थानानुपक्रमते(ज्योतिरन्तरापेक्षया दीप्तः)। किंच तृतीयनिर्वचनानुसारेणोक्तं यत्– देवमाता अदितिः, अदितेः पुत्र आदितेयः; आदितेयशब्द आदित्य इत्याकारं धारयति। दुर्गाचार्यस्य नये तु–**" सोऽयमादितेयः सन्नादित्य इत्युच्यते"** इति।[35]

यास्काचार्यकृतेन प्रथमनिर्वचनद्वयात् सूर्यवाचकस्यादित्यस्य कानिचन वैशिष्टान्युल्लिखितानीति। सौरजगति सूर्योऽन्यतमनक्षत्रविशेषः। सौरकिरणैर्भौमरसाः घर्मरूपं प्राप्योर्धमुत्तिष्ठन्ति। सौरजगतः केन्द्रस्थितः सूर्यः जाज्वल्यमान् ग्यासीयपिण्डस्वरूप इति। अस्य बहिरुष्णता प्रायशः षट्सहस्रं डिग्रि सेण्टिग्रेडिति। अतः सूर्यः स्वदीप्त्या दीप्तिमान् इत्यपि संगतम्। आकाशगङ्गा इति छायापथि सूर्यं विना कोटयः कोटयः नक्षत्राणि सन्ति। निशायां आकाशे चन्द्रं विना यानि नक्षत्राणि दृश्यन्ते तानि सर्वाणि आकाशगङ्गा इति छायामार्गस्यन्तर्गतानीति। पृथिवीतः बहौ दूरे स्थितत्वात्तानि क्षुद्राणीति लक्ष्यन्ते। परन्तु तेषामपेक्षया आदित्योऽस्मान् सन्निहित इति। पुनश्च चन्द्रात् सूर्यस्याकारोऽत्यधिक इति। अतः सूर्योदयादनन्तरमेव चन्द्रनक्षत्रसमूहयोः प्रभा नश्यते। तस्मात् सूर्यः चन्द्रादीनां ज्योतिष्मतां पदार्थानां प्रभां नश्यतीति यास्काचार्यस्योक्तिरप्यर्वाचीनभौगोलिकभावनाया बीजस्वरूपेति।

**<u>शृङ्गशब्दः–</u>**

यास्काचार्यः तस्य विरचिते निरुक्तग्रन्थे सूर्यरश्मिवाचकस्य शृङ्गशब्दस्यापि निर्वचनं कृतवान्। उक्तं यत्–

**शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वा।**[36]

अर्थात् शृङ्गशब्दः 'शृ'–धातोरथवा 'शृ'–धातोरथवा 'शम्'–धातोरुत 'शृ'+'गम्'–धातयोर्निष्पन्नोऽथवा शरण+'गम्'–धातोः सृष्टः; हिंसार्थं रक्षार्थं वोद्गतः, वा शिरस्+'गम्'–धातोर्निष्पन्नः शृङ्गशब्दः, अर्थात् शिरसो निर्गत आदित्य इति।

अत्र दृश्यते यत् शृङ्गशब्दस्यानेकविधानि निर्वचनानि कृतानि यास्काचार्येण। तानि यथा–

प्रथमनिर्वचनानुसारेण सेवनार्थकादित्युक्ते आश्रयकरणार्थकात् 'श्रि'–धातोर्निष्पन्नस्य शृङ्गशब्दस्य व्युत्पत्तिर्भवति– यत् सूर्यमण्डलमाश्रित्य तिष्ठति(श्रितं हि तदाश्रितं मण्डले)। द्वितीयानुसारेण हिंसार्थकस्य 'शृ'–धातोरथवा 'शम्'–धातोर्वा निष्पन्नस्य शृङ्गशब्दस्य व्युत्पत्तिर्यथा– ग्रीष्मऋतौ यत् प्राणिनो हिनस्ति(हिनस्ति हि तद् ग्रीष्मे प्राणिनः)। तृतीयानुसारेण हिंसार्थक–'शृ'–धातुः 'गम्'–धातुश्च मिलित्वा, पुनश्च रक्षणार्थकशरणशब्दः 'गम्'–धातुश्चोभयसंयोगेनोत्पन्नस्य शृङ्गशब्दस्य व्युत्पत्तिर्भवति–

यदन्धकारादेर्हिंसार्थमुगतमिति(तम आदेर्हिंसार्थमित्यर्थः); यच्छस्यनिष्पत्त्या प्राणिनः रक्षति(रक्षति हि प्राणिनः शस्यनिष्पत्त्यादिना) इति। चतुर्थनिर्वचनानुसारेण शृङ्गशब्दः शिरस्–शब्दपूर्वकाद् 'गम्'–धातोर्व्युत्पन्नः, अस्यार्थ भवति– यच्छिर इत्युक्ते आदित्यान्निर्गतमिति(शिरसः आदित्यान्निर्गतमित्यर्थः 'असावादित्यः शिरः प्रजानाम्'– इतिश्रवणात्, 'अपि वा शिर आदित्यो भवतीति'।

पूर्वोक्तनिर्वचनसमूहात् सूर्यस्य रश्मिविषये कानिचन तत्त्वानि ज्ञायन्ते, तानि यथा– सूर्यरश्मिः सूयादेव निःसरति पुनश्च सूर्यमण्डले स्थित इति तत्त्वम्; सौरजगति सूर्य एक ज्वलन् वाष्पयुक्तपिण्डविशेषश्च। अस्मिन् सततं हैड्रोजेन्(Hydrogen) इति वाष्पं हेलिउम्(Helium) इति वाष्पे रूपान्तराद्विपुलाः शक्तय उत्पद्यन्ते, अस्याः शक्त्याः प्रायशः २००कोटि–भागस्य भागमेकं सूर्यरश्मिना आलोकोष्णतारूपेण पृथिवीमागच्छति। अत उक्तिरियं यथार्थमिति। पुनरपि पृथिव्यां प्राणानां मूलस्वरूपः सूर्येति। सुर्यरश्मिनैव उद्भिदां बीजस्याङ्कुरोद्गमं संभवतीति। उद्भिदां खाद्योत्पादनेऽपि सूर्यरश्मेर्विशेषगुरुत्वमस्ति। अतः शस्योत्पादनेऽपि सूर्यरश्मिरत्यावश्यकेति। जगदिदं सूर्येणैव विराजितं, सूर्यालोकेनैव पृथिव्यां तमसः दूरीकरणं भवति, पृथिव्यालोकोज्ज्वला भवतीति। ग्रीष्मऋतौ सूर्यकिरणसमूहः भूपृष्ठमुल्लम्बरूपेणागच्छति। तस्मिन्काले दीर्घक्षणं यावत् दिवा भवति रात्रिश्चापेक्षयाल्पक्षणमिति। अतो दीर्घे दिवसे सूर्यरश्मिना भूपृष्ठ उत्तप्तो भवति, किन्तु रात्रिरल्पक्षणविशिष्टत्वात् गृहीतं सर्वं तापमपसारयितुं न शक्नोति। अतो क्रमेणोष्णतावृद्धौ प्राप्ते सति प्राणिनां जीवनधारणं दुरूहं भवतीति। अतो सूर्यरश्मिः ग्रीष्मऋतौ प्राणिनो हिनस्तीत्याशय। तस्मादिदं वक्तुं शक्यते यन्निर्वचनमिदमाधुनिकभूवैज्ञानिकभावनाया आधारस्वरूपमिति।

**अहोरात्राभ्यामुत्पन्नं संवत्सरचक्रम्–**

यास्काचार्येण तस्य विरचिते निरुक्तग्रन्थे संवत्सरचक्रस्य वर्णनाप्रसङ्गे ऋग्वेदान्तर्गतस्य प्रथममण्डलस्थितस्य सूक्तस्य मन्त्रांशमेकमुल्लिखितम्। तत्रोक्तं यत्–

**तस्मिन् साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः** इति।[37]

अर्थात्तस्मिन्चक्रे संवत्सरचक्रे वा षष्ट्यधिकं शतमहोरात्रसमूहाः शङ्कव इव विद्यन्ते।

तस्य नये मन्त्रांशस्थितो द्वितीयनकारः समुच्चयार्थक इति। अनेन 'न'- कारेणैव त्रिशताषष्टिर्न इति शब्दस्यार्थो भवति षष्ट्यधिकं त्रिशतं च, वृत्तिकारस्य दुर्गाचार्यस्य मते- **"षष्टिर्न षष्ट्यधिकशतत्रयात्मका आरास्तत्स्थायान्यहानि"** इति।[38] पुनरपि चलाचलास इत्युक्ते चलानि च अचलानि च द्योत्येते। चलाचलासशब्दस्यार्थोऽहोरात्रयः। ते न ध्रुवा सन्ति, नापि च स्वभावात् सरन्ति; वृत्तिकारस्य दुर्गाचार्यस्य नये तु- **"चलाचलासः चलाचलाः चलनस्वभावानि"**।[39] मन्त्रान्तर्गतः प्रथमो नकार उपमार्थे प्रयुक्तः। अतः शङ्कव न इत्युक्ते शङ्कव इव इत्यर्थो जायते। तस्मादुद्धृतमन्त्रांशेन दिनरात्र्योरेकत्रविचारेण संवत्सरे षष्ट्यधिकं त्रिशतं दिवसाः सन्ति।

दिवसरात्र्योर्भिन्नत्वानुसारेण संवत्सरस्य वर्णनाप्रसङ्गे यास्काचार्य ऋग्वेदस्य मन्त्रांशमेकमपि उल्लिखितवान्। उक्तं यत्-

**सप्त शतानि विंशतिश्च तस्थूः** इति।[40]

अस्मिन् चक्रे विंशत्यधिकं सप्तशतं (अग्नेः पुत्राः) अर्थादादित्यस्य पुत्राः सन्तीति।

तस्य नयेन एकस्मिन् संवत्सरे विंशत्यधिकं सप्तशतमादित्यपुत्रा अहोरात्रयः विद्यन्ते। षष्ट्यधिकं त्रिशतं दिवसा एतत्संख्यका रात्रयश्च मिलित्वा एकसंवत्सरचक्रम् इति।

यास्काचार्यस्य मतद्वयं प्रायः आधुनिकभूगोलविदां मतस्यानुरूपमिति। यतो हि तेषां मतानुसारेण पृथिवी तस्या उपवृत्ताकारकक्षपथि स्वस्याक्षस्य समन्ताद्यथा भ्राम्यति, तथा सूर्यस्य समन्ततोऽपि। सूर्यस्य समन्ततः सकृद्भ्रमणकालो यथा पञ्चाधिकं त्रिशतं षट्घटिकाश्च दिवसाः। अयं दिवससमूहः संवत्सर इति नाम्ना ज्ञायते। कदाचित् ३६६दिवसेष्वपि संवत्सरो भवति। पुनः भुव आह्निकगत्याः समयकालः चतुर्विंशतिर्दिवससमूह इति। समयोऽयं एकं दिनं वा सौरदिनमित्युच्यते। एकस्मिन् दिवसे द्वादशघटिका दिनं रात्रिश्च द्वादशघटिका इति, द्वयोः संयोगेन चतुर्विंशतिघटिकासंपन्नमेकदिनं स्यात्। अतो दिनरात्र्योः समष्ट्या, व्यष्ट्या च यथाक्रमेण ३६५दिवसेषु ७३० दिवसेषु च संवत्सरो भवति। तस्माद्यास्काचार्यस्य मतमाधुनिकभावनाया बीजस्वरूपमिति वक्तुं शक्यते।

**<u>द्वादशमासात्मकं संवत्सरचक्रम्–</u>**

यास्काचार्यस्य नयेन द्वादशमासात्मकं संवत्सरं भवति। प्रसङ्गेऽस्मिन् ऋग्वेदस्थितप्रथममण्ड्लस्य चतुःषष्ट्यधिकं शतमिति सूक्तस्य मन्त्रद्वयमुल्लिखितम्। उक्तं यत्–

**द्वादशारं न हि तज्जराय** इति।

**द्वादश प्रधयश्चक्रमेकम्** इति च।[41]

प्रथममन्त्रांशस्यार्थो भवति द्वादशसंख्यकमरविशिष्टं चक्रम्। तत् कदापि जीर्णं न भवति, प्रसङ्गेऽस्मिन् दुर्गाचार्य उक्तवान्– **"न हि जराय न हि तज्जीर्यते अन्यानि भूतानि जरयत्"** इति।[42] अत्रारशब्दस्यार्थो मास इति। तस्माद्द्वादशमासविशिष्टं संवत्सरचक्रमित्यर्थो जायते।

द्वितीयमन्त्रांशान्तर्गतस्य प्रधिशब्दस्य वाच्यार्थः परिधिः, चक्रस्य नेमीप्रदेश इति। अत्र प्रधिशब्देन मासो द्योत्यते। चक्रमेकमर्थाद् मन्त्रस्य संपूर्णार्थो भवति द्वादशमासात्मकं संवत्सरचक्रमिति। पुनश्च यास्काचार्यो मासः प्रधिश्चेति शब्दद्वयस्य निर्वचनं कृतवान्। तेनोक्तं–

**मासाः मानात्, प्रधिः प्रहितो भवति** इति।[43]

मासशब्दो मानार्थकाद् 'मा'–धातोर्निष्पन्नः। मासैः संवत्सरः परिमीयते। प्रधिशब्दस्य व्युत्पत्तिः कृता यद् प्र– इत्युपसर्गपूर्वकाद् 'धा'–धातोः प्रधिशब्दो निष्पन्नः; परस्परं संहृत्य प्रश्लेष्य वा ते प्रहिता निहिताः, अर्थाद्द्वादशमासानां संहतिरूपेण चक्रमेकमुत्पद्यते तत् संवत्सरचक्रमेति। वृत्तिकारस्य दुर्गाचार्यस्य नये–" **प्रधिः प्रहितः प्रश्लिष्य निहितः, द्वादशप्रधयः मासाख्याः संहताः सन्तः चक्रमेकं भवति"**।[44]

पूर्वोक्तालोचनादिदं ज्ञायते यदाचार्यस्य मतस्यानुवृत्तिर्भवत्याधुनिकभावनायामपि। यतो हीदानीमपि मन्यते यद्द्वादशमासानां समूहेनैव संवत्सरचक्रं संपूर्णं भवति।

**<u>ऋतुत्रयविशिष्टं संवत्सरचक्रम्–</u>**

संवत्सरचक्रम् ऋतुत्रयविशिष्टमिति ज्ञापनार्थं यास्काचार्येण तस्य विरचिते निरुक्तमिति वेदाङ्गशास्त्रे ऋग्वेदप्रथममण्डलान्तर्गतस्य चतुःषष्ट्यधिकं शतमिति सूक्तस्य द्वितीयमन्त्रमुल्लिखतम्। तत्रोक्तं यत्–

**सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।**

**त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थू।।**[45]

मन्त्रस्य द्वितीयार्धे संवत्सरो वर्ण्यते। अत्र 'त्रिनाभिचक्रमिति' पदस्य व्याख्यानरूपेण ऋतुत्रयसमन्वितं संवत्सरचक्रमित्युल्लिखितम्। तस्य मते त्रिनाभिचक्रमित्यस्यार्थो भवति त्र्यृतुः संवत्सरः। त्र्यृतुरित्युक्ते ग्रीष्म–वर्षा–हेमन्तादयः त्रय ऋतव इति द्योत्यन्ते। प्रसङ्गेऽस्मिन् तस्योक्तिर्यथा–

**संवत्सरप्रधान उत्तरोऽर्धर्चस्त्रिनाभिचक्रं त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति।**[46]

अत्र चक्रशब्दस्यार्थः कालचक्रमर्थात् संवत्सरः; चक्रमिव संवत्सरः परिवर्तते । भाष्यकारस्य स्कन्दस्वामिनो नये– **"परिवर्तनसामान्यात् संवत्सरस्य चक्रव्यपदेशः"** इति।[47] त्रिनाभिरिति पदं चक्रशब्दस्य विशेषणम्। ऋतुत्रयं संवत्सरस्य नाभिस्वरूपम्। ऋतुत्रयेणैव संवत्सरो नद्धो बद्धो वेति। पसङ्गेऽस्मिन् स्कन्दस्वामिन उक्तिर्यथा**–" त्रिनाभि नाभित्रयं ग्रीष्मो वर्षा हेमन्त इत्येते ऋतवो नाभिस्थानं यस्य तत् त्रिनाभि" इति।** [48] दुर्गाचार्यस्योक्तिर्यथा – **"ऋतुभिर्हि असौ संवत्सरो नह्यते सन्नह्यते इत्यर्थः"** इति।[49] त्रय ऋतवो यस्मिन् सः त्र्यृतुरिति; संवत्सरे ग्रीष्मो वर्षा हेमन्तश्च त्रय ऋतवः प्रधानाः, इतरऋतुविशेषाः तेषामन्तर्हिता इति। आदित्यः संवत्सरचक्रस्य प्रवर्तकः।

**पञ्चऋतुविशिष्टं संवत्सरचक्रम्–**

इत्यस्मिन्प्रसङ्गे यास्काचार्येण पूर्वोल्लिखितस्य सूक्तस्य त्रयोदशमन्त्रो व्याख्यातः। उक्तं यत्–

**पञ्चारे चक्रे परिवर्तमाने** इति।[50]

पञ्चारे चक्रे इत्युक्ते पञ्चारविशिष्टे चक्रे द्योत्यते। परिवर्तमाने पदस्यार्थो नियतभ्राम्यमाणे। अरशब्दस्य वाच्यार्थः चक्रस्य नेमिप्रदेशो यश्च नाभ्या संयोजककाषठखण्डविशेष इति। अत्र अरशब्दस्यार्थ ऋतुः। तस्मात् पञ्चारे चक्रे इत्यस्यार्थः पञ्चऋतुविशिष्टे संवत्सरचक्रे। अस्मिन् प्रसङ्गे स्कन्दस्वामी उक्तवान्– **"ऋतवः पञ्च हेमन्तशिशिरौ तुल्यप्रभवत्वात् समासेनैकः, इतरे चत्वारस्ते अरभूता यस्य तत् पञ्चारस्तस्मिन् चक्रे संवत्सराख्ये"**।[51]

**षड्तुविशिष्टं संवत्सरचक्रम्–**

अस्मिन् प्रसङ्गे यास्काचार्यः पूर्वसूक्तस्य द्वादशमन्त्रमुक्तवान्। सो यथा–

**षड्र आहुरर्पितम्** इति।[52]

अस्य वाक्यस्यान्वयो भवति षड्रे(षट् अरविशिष्टे चक्रे) अर्पितम् आहुः इति। अर्थात् ऋतुषड्विशिष्टं संवत्सरचक्रमिति। अन्त्यरूपेण सः प्रचलितमतमुक्तवान्, तत्रोक्तं यत्–

**इति षड्तुतया**।[53]

अर्थात् संवत्सरस्य षड्तुविशिष्टत्वरूपेणेयं वर्णना। संवत्सरः षड्त्वात्मक इति साधारण प्रचलित वा मत।

पूर्वोक्तालोचनादिदमुपसंह्रियते यत् संवत्सरे षट् ऋतवः विराजन्ते। सूर्यतापस्य भिन्नतानुसारेण संवत्सरं यावत् पृथिव्या विविधस्थानेषु तापस्य भिन्नता लक्ष्यते। तदनुसारेण संवत्सरः केषुचिद्भागेषु विभज्यते, प्रतिभाग ऋतु इति नाम्ना ज्ञायते। एवं प्रकारेण एकस्मिन् संवत्सरे ग्रीष्मः, शरत्, शीतः, वसन्तश्चेति चत्वार ऋतवः सन्तीति स्वीक्रियते, तथापि दक्षिणपूर्व–एशिया इति महादेशान्तर्गते देशसमूहे हिमकालस्य प्रथमभागो हेमन्तकाल इत्युच्यते पुनश्च ग्रीष्मऋतोरन्तिमे दक्षिण–पश्चिममौसुमिवायुभ्यां प्रवलं वर्षणं भवति, कालोऽयं वर्षाकाल इति नाम्नाभिधीयते। अतो ग्रीष्मो वर्षा शरद् हेमन्तो हिमः शीतो वा वसन्त इति षट् ऋतवः संवत्सरं यावद् विराजन्ते। तस्मादिदं वक्तुं शक्यते यद्यास्काचार्यस्योक्तिर्यथार्थरूपेण भौगोलिकभावनासंमतमिति।

**ऋतुवाचकानां षण्णां शब्दानां निर्वचनसमूहः–**

निरुक्तमिति निर्वचनशास्त्रे याकाचार्य ऋतुवाचकानां शब्दानामपि निर्वचनं प्रदर्शितम्। ता यथा–

**<u>ग्रीष्मः–</u>**

ऋतुवाचकस्य ग्रीष्मशब्दस्य व्युत्पत्तिप्रसङ्गे तेनोक्तं यत्–

**ग्रीष्मोग्रस्यन्तेऽस्मिन् रसाः** इति।[54]

अर्थाद्यस्मिन्काले रसा ग्रस्यन्ते, स ग्रीष्मकालेति।

'ग्रस्' इति धातोरुत्तरं मक्–प्रत्यययोगेन ग्रीष्मशब्दस्य निष्पत्तिः; ग्रीष्मऋतौ सूर्यरश्मिना जलाशय–ओषधि–वनस्पतिभ्यो रसाः शुष्यन्ते। वृत्तिकारस्य दुर्गाचार्यस्य नये– **"ग्रस्यन्ते...सूर्येण"** इति।[55]

**<u>वर्षा–</u>**

वर्षाशब्दस्य व्युत्पत्तिर्यथा–

**वर्षा वर्षत्यासु पर्ज्जन्यः** इति।[56]

यतो वृष्टेर्देव इन्द्रो वृष्टिं वर्षति, तस्माद्वर्षा इति नाम।

अत्र दृश्यते यद् आसु इत्यतो वर्षासु इत्यस्माद् जातो वर्षाशब्दो नित्यबहुवचनान्तः शब्दः। 'वृष्' इति धातोर्निष्पन्नो वर्षाशब्दः, पर्जन्यदेवोऽस्मिन्काले वर्षणं करोतीति।

**<u>शरत्–</u>**

शरच्छब्दस्य व्युत्पत्तिप्रसङ्गे यास्काचार्य उक्तवान्–

**शरच्छता अस्यामोषधयो भवन्ति शीर्णा आप इति** वा।[57]

अर्थादस्मिन् काले ओषधयः पक्वं भवन्ति वा आपः शीर्णा भवन्तीति।

आचार्येण शरच्छब्दस्य व्युत्पत्तिद्वयमुक्तम्। प्रथमानुसारेण– पाकार्थकात् 'श्रा' इति धातोः शरदिति शब्दस्योत्पत्तिः; शरदि ब्रीह्यादय ओषधिसमूहाः परिपक्वं भवन्ति। शृतशब्दः शृ+अ+त्–इत्यस्माद् जायते, तस्मात् शरदिति। द्वितीयानुसारेण– हिंसार्थकात् 'शॄ' इति

धातोः शरदिति शब्दस्य व्युत्पत्तिरिति; शरदि शीर्णं भवन्ति वर्षासु प्रबृद्धानि जलानि। वृत्तिकारस्य उक्तिर्यथा– **"वर्षासु हि प्रवृद्धानि स्रोतांसि शरदि विशीर्यन्ते"** इति।[58]

**<u>हेमन्तः–</u>**

हेमन्तशब्दस्य निर्वचनं भवति–

**हेमन्तो हिमवान्** इति।[59]

अर्थाद् हेमन्तऋतुर्हिमवान् स्यात्। हिमवदिति शब्द एव हेमन्त इत्याकारं प्राप्नोति। हिमवदित्यस्माद् हिमवानिति, तस्मादेव हेमन्तः; हेमन्तऋतौ हिमस्याधिक्यं दृश्यते। दुर्गाचार्यस्य मते तु– **"तत्र हि बहु हिमं भवति"** इति।[60]

**<u>हिमः–</u>**

हिमशब्दस्य व्युत्पत्तिप्रसङ्ग उक्तवान्–

**हिमं पुनर्हन्तेर्वा, हिनोतेर्वा** इति।[61]

हिमशब्दो 'हन्'–धातोरथवा 'हि' इति धातोरुत्पन्नः।

अतो दृश्यते यद् हिमशब्दस्य द्वयं निर्वचनं यास्काचार्येण प्रदर्शितम्। तत्र प्रथमो यथा– 'हन्' इति धातोरुत्तरं मक् इति प्रत्यययोगादेव हिम इति शब्दो निष्पन्नः। 'हन्' इति धातोरर्थो हिंसां करोति गमयति वा। हिम ओषधिन् हन्ति, हिमो भूतसमूहं क्षयं प्रति गमयति वा। भाष्यकारस्य स्कन्दस्वामिनो मतेन– **"हन्ति हि तदोषधिवनस्पतीन्"** इति।[62] दुर्गाचार्यस्य नये– **"हिनोतेर्वृद्ध्यर्थस्य तद्धि गमयति क्षयं भूतानि"**।[63] द्वितीयनिर्वचनं यथा– हि इति धातो मक् इति प्रत्यययोगाद् हिमस्योत्पत्तिरिति। अत्र हिधातुर्वृद्ध्यर्थकः; हिमकाले हिमरथवा यवादिशस्यो वर्धते इति।

**<u>शिशिरम्–</u>**

यास्काचार्यो वसन्तऋतुवाचकस्य शिशिरशब्दस्य निर्वचनप्रसङ्गे निरुक्तमित्यत्रोक्तं यत्–

**शिशिरं शृणातेः शम्नातेर्वा**।[64]

अर्थाच्छिशिरशब्दः 'शॄ'–धातोरथवा 'शम्'–धातोः सृष्टः।

'शॄ'–धातुः 'शम्'–धातुचेत्युभयधातौ हिंसार्थकौ। शिशिरशब्दः शॄधातोरथवा 'शम्' इति धातोरुत्तरं किरच् इति प्रत्यययोगेन निष्पन्नः; अस्यार्थो भवति यस्मिन्काले हिंसा अनुष्ठीयन्ते। शिशिरं तृण–लता–वृक्षादीन् दाहयति, पुनश्चास्मिन् काले हिमकालेषु जातानि शस्यानि दग्धं भवन्तीति। वृत्तिकारस्य दुर्गाचार्यस्य मते तु–**"शिशिरं शृणातेः हिंसार्थस्य शम्नातेर्वा हिंसार्थस्यैव। हिनस्ति हि तस्मिन्कालेऽप्रतिबध्यमानो दवाग्निरतिशयेन शुष्कानोषधिवनस्पतीन् इति"**।[65]

पूर्वोक्तालोचनाद् यानि तत्त्वानि प्राप्यन्ते, तान्याधुनिकभूगोलश्रास्त्रेऽप्यालोचितानि। पृथिव्या वार्षिकगत्या एकमुल्लेखार्हं फलं यथा ऋतुपरिवर्तनमिति। ऋतोः परिवर्तनस्य फलरूपेण पृथिव्यां क्रमशः ग्रीष्मः शरत् शीतो वसन्त इत्यादिना सह ग्रीष्मान्ते वर्षाऋतुः, शीतऋतोः प्रथमे हेमन्तऋतुश्च चक्राकारेण वर्तेते। ग्रीष्मऋतावधिके दिवाभागे सूर्यस्य लंबरूपेणागतेन किरणेनोष्णताधिका भवति, तस्मात् कारणाद् जलाश्य–ओषधि–वनस्पतिभ्यो रसा ग्रस्यन्ते। ग्रीष्मान्ते वर्षाऋतौ प्रवलवर्षणेन शुष्कप्रायो जलाशयः पूर्णो भवति। पुनश्च शरदि वर्षाकाले रोपिता धान्यादय ओषधिसमूहा पक्वं भवन्ति। वर्षासु पवृद्धानि जलान्यल्पं भवन्ति, वर्षणस्य न्यूनत्वादिति। शीतऋतो प्रथमे हेमन्तकाले सूर्यस्य तिर्यग्रूपेणागतेन किरणेनाल्पेन दिवेसेन च जलवायुः शीतलो भवति। हिमकालस्योष्णता अस्मादपि न्यूना भवति। पार्वत्यदेशे कदाचित् तुषारोऽपि पतति। एभिः कारणैर्भूतसमूहा मृयन्तो। भूयः हिमकाले यवादिशस्यान्यनुकूलपरिवेशे वर्धन्ते। वसन्तऋतौ तापस्य वृद्धौ सति पुनश्च शीतऋतौ जातः तृणौषध्यादिः हिंस्यते। अतो वक्तुं शक्यते यदाधुनिकभौगोलिकभावनाया बीजं यास्काचार्येण विरचितं निरुक्तमिति निर्वचनशास्त्रे निहितमिति।

******

**आकरनिर्देशः**

[1] ठाकुरः (संपा.), नि. ३/२०/११, पृ. ४४४।

[2] तदेव १०/३४/५, पृ. ११४७।

[3] तदेव २/६/१०, पृ. २२५।

[4] मु.श. (संपा.), नि. २/२, पृ. ७४।

[5] ठाकुरः (संपा.), नि. २/१८/३, पृ. २८५।

[6] तदेव १/३/७, पृ. १३५।

[7] मु.श. (संपा.), नि.१/४, पृ. ३६–३७।

[8] ज्ञा.शा. (संपा.), नि. १/३, पृ. ४२।

[9] ठाकुरः (संपा.), नि. २/१०/१३, पृ. २४८।

[10] ल.स्व. (संपा.), नि. भा. २/१०, पृ. ७०।

[11] तत्रैव।

[12] तत्रैव।

[13] ल.स्व. (संपा.), नि. भा. २/१०, पृ. ७१।

[14] ठाकुरः (संपा.), नि. २/२१/५, पृ.२९७।

[15] तदेव २/२१/७, पृ.२९८।

[16] तदेव ५/२७/३, पृ. ६८४।

[17] तदेव ९/२६/१७, पृ. १०४२।

[18] ल.स्व. (संपा.), नि. भा. ९/२६, पृ. १६६।

[19] ठाकुरः (संपा.), नि. ९/२६/२८, पृ. १०४३।

[20] ल.स्व. (संपा.), नि. ९/२७, पृ. १६६।

[21] ठाकुरः (संपा.), नि. ९/२६/५, पृ. १०३९।

[22] मु.श. (संपा.), नि. ९/३, पृ. ४२२।

[23] तदेव ९/२६/४, पृ. १०३९।

[24] तदेव ९/२६/७, पृ. १०४०।

[25] तदेव २/८/२, पृ. २८५।

[26] तदेव ८/१०/९, पृ. ९६७–९६८।

[27] मु.श. (संपा.), नि. ८/२, पृ. ३९९।

[28] ठाकुरः (संपा.), नि. ११/५/७, पृ. ११७९।

[29] तदेव ११/५/८, पृ. ११७९।

[30] तदेव ११/५/६, पृ. ११७८।

[31] तदेव २/१३/२, पृ. २६०।

[32] मु.श. (संपा.), नि. २/४, पृ. ८४।

[33] ल.स्व. (संपा.), नि. भा. २/१३, पृ. ८०।

[34] मु.श. (संपा.), नि. २/४, पृ. ८४।

[35] तत्रैव।

[36] ठाकुरः (संपा,), नि. २/७/३, पृ. २२८।

[37] तदेव ४/२७/२३, पृ.५७६।

[38] मु.श. (संपा.), नि. ४/४. पृ. २०८।

[39] तत्रैव।

[40] ठाकुरः (संपा.), नि. ४/२७/२५, पृ. ५७७।

[41] तदेव ४/२७/२१, पृ. ५७६।

[42] मु.श. (संपा.), नि. ४/४, पृ. २०८।

[43] ठाकुरः(संपा.), नि. ४/२७/२२, पृ. ५७६।

[44] मु.श. (संपा.), नि. ४/४, पृ. २०८।

[45] ठाकुरः(संपा.), नि. ४/२७/१, पृ. ५७०।

[46] तदेव ४/२७/७, पृ. ५७२।

[47] ल.स्व. (संपा.), नि. भा. ४/२७, पृ. २८२।

[48] तत्रैव।

[49] मु.श. (संपा.), नि. ४/४, पृ. २०६।

[50] ठाकुरः (संपा.), नि. ४/२७/१५, पृ. ५७४।

[51] ल.स्व. (संपा.), नि. भा. ४/२७, पृ. २८२।

[52] ठाकुरः (संपा.), नि. ४/२७/१७, पृ. ५७५।

[53] तदेव ४/२७/१८, पृ. ५७५।

[54] तदेव ४/२७/९, पृ. ५७३।

[55] मु.श. (संपा.), नि. ४/४, पृ. २०६।

[56] ठाकुरः (संपा.), नि. ४/२७/१०, पृ. ५७३।

[57] तदेव ४/१५/२२, पृ. ५६६।

[58] मु.श. (संपा.), नि. ४/४, पृ. २०४।

59 ठाकुरः (संपा.), नि. ४/२७/११, पृ. ५७३।

60 मु.श. (संपा.), नि. ४/४, पृ. २०६।

61 ठाकुरः (संपा.), नि. ४/२७/१२, पृ. ५७३।

62 ल.स्व. (संपा.), नि. भा. ४/२७, पृ. २८२।

63 मु.श. (संपा.), नि. ४/४, पृ. २०६।

64 ठाकुरः(संपा.), नि. १/२/६/३, पृ. १०८।

65 मु.श. (संपा.), नि. १/३, पृ. ३०।

# पञ्चमोऽध्यायः

# निरुक्तग्रन्थे भौतवैज्ञानिक–तत्त्वानि

भौतविज्ञानमेकं स्वतन्त्रं शास्त्रम्, यत्र स्थावराणामुपादानां शक्तिनां चालोचना विद्यते। प्राकृतिकविज्ञानस्य शाखाविशेषं शास्त्रमिदम्। एवं मन्यते यदस्य शास्त्रस्य भेदचतुष्टयमस्ति। यथा– पदार्थ–विज्ञानम्(Physics), रसायन–विज्ञानम्(Chemistry), नक्षत्र–विज्ञानम् ज्योतिर्विज्ञानम् वा(Astronomy, भू–विज्ञानम्(Earth Science) च।

पदार्थविज्ञाने पदार्थानां भौतधर्मः जैवाजैवशक्तिश्च वर्ण्येते। वलविज्ञान–आलोकविज्ञान–ताप–चुम्वक–तडिद्विज्ञानानि पुनश्च पदार्थानां शारीरिकवैशिष्टानि पदार्थविज्ञानस्याङ्गानि इति। शास्त्रेऽस्मिन् प्रधानरूपेण परमाणोः सृष्टिप्रक्रिया वैशिष्टं च दृश्येते। रसायनविद्यायां त्वणूनामितरेतरसंयोग आलोच्यते। अत्रैव शास्त्रद्वयोर्मध्ये अन्योन्यसंबन्धः। ज्योतिर्विज्ञानशास्त्रे ग्रहोपग्रहनक्षत्रादीनां सम्यग्रूपेणालोचानास्ति। भूविज्ञानमपि भूगोल–भूतत्त्वयोः शास्त्रयोः समाहाररूपम्। अत्र पृथिव्या विविधांशस्य भौगोलिकवैशिष्टं , प्राचीनता, निर्माणपर्यायश्चेत्यादयो विषया वर्ण्यन्ते।

आचार्येण यास्केन तस्य विरचिते निरुक्तमिति निर्वचनशास्त्रे विविधवैदिकशब्दस्य निर्वचनप्रसङ्गे विविधानि तत्त्वानि प्रदर्शितानि, यान्याधुनिकभौतवैज्ञानिकशास्त्रेऽप्यालोचितानि। तषु कानिचिद्यथा–

**<u>सुपर्णशब्दः–</u>**

यास्काचार्य सुपर्णशब्दस्यापि निर्वचनं प्रदर्शितवान्। उक्तं यत्–

**सुपर्णाः सुपतना आदित्यरश्मयः** इति।[1]

सुपर्णा इतुक्ते सुपतना आदित्यरश्मय क्षिप्रगामिन आदित्यरश्मयो वेति द्योत्यते। रश्मिनामवाचके शब्दसमूहे सुपर्णशब्दस्य पाठो दृश्यते, अतः सुपर्णशब्दस्यार्थो भवत्यादित्यरश्मय इति। सुपतना इति पदं सुपर्णाः शब्दस्य यौगिकार्थं प्रकाशयति।

स्कन्दस्वामिनो मते च–" **सुपर्णशब्दस्य रश्मिनामसु पाठात् सुपतना इति निर्वचनाभिप्रायः"** इति।[2] वृत्तिकारेण दुर्गाचार्येण उक्तं यत्– **"वयः आदित्यरश्मयः...सुपर्णा सुपतना एत एव उपसेदुः उपसीदन्ति"** इति।[3] अर्थाद् वयः शब्दस्यार्थ आदित्यरश्मयः, सुपर्णा इति शब्दः तस्य विशेषणमिति। तेन सुपर्णा इति शब्दस्य व्याख्या भवति सुपतना इति।

निर्वचनादस्माद्ज्ञायते यद् सूर्यरश्मिसमूहः क्षिप्रगतिसंपन्नः। मतमिदं तु विज्ञानसंमतम्। यतो हि भौतवैज्ञानिकशास्त्राणुसारेणाप्यालोकरश्मिः सर्वाधिकगतिसंपन्नः, न किंचिदस्ति तस्येव गतिसंपन्न इति। शूण्यमाध्यमेन तस्य गतिर्भवति मुहुर्ते त्रिलक्षं किलोमिटर् इति। सूर्यात् पृथिवी प्रायः पञ्चदशकोटिः किलोमिटर् इति दूरे स्थिता, तथापि किरणानि सूर्यात् पृथिबीमागच्छन्ति अष्टौ निमेष विंशति मुहुर्तश्चेति कालं यावत्।

<u>**सप्तपुत्रम्–**</u>

यास्काचार्यो वैदिकमन्त्रान्तर्गतपदरूपेण सप्तपुत्रमिति पदस्यापि निर्वचनं कृतवान्। तत्प्रसङ्गयुक्तवान् यत्–

**सप्तपुत्रं सप्तमपुत्रं सपर्णपुत्रमिति वा, सप्त सृप्ता संख्या, सप्तादित्यरश्मय इति वदन्ति।**[4]

अतः सप्तपुत्र इति शब्दस्यार्थो भवति सप्तमपुत्रोऽथवा गतिमत्पुत्रविशेषरुत सप्तसंख्यकपुत्रविशिष्टऽपि भतितुं शक्नोति, यत्र सप्त इत्युक्ते सृप्तोऽर्थात् षडतिरिक्तसंख्याविशेषो द्योत्यते। षट्संख्यायाः परस्थितसंख्या सप्तसंख्येति। आदित्यरश्मयः सप्त इत्यपि मन्त्रविदो वदन्ति।

अत्र दृश्यते यद् आदित्यः सप्तपुत्र इति नाम्नाभिधीयते। भाष्यकारेण स्कन्दस्वामिनोक्तं सप्तपुत्रस्य सप्तमपुत्र इत्यर्थो भवितुमर्हति। तस्य नये तु– **"वृत्तिविषये संख्याशब्दस्य पूरणार्थत्वम्"** इति।[5] पुनश्च तेनोक्तं यत्– **"अदितिः पुत्रकामा इति प्रस्तुतस्यैव मित्रं च वरुण इत्यादिषु सप्तम इति"**।[6] ऐतिहासिकानां मतेऽप्यादित्य अदितेः सप्तमपुत्र इति। अथवा सपर्णपुत्रऽपि भवितुं शक्नोति; आदित्यस्य पुत्ररूपा रश्मयः सर्वदा गन्तारो भवन्ति, कदापि न ध्रुवरूपेण तिष्ठन्तीति। प्रसङेऽस्मिन् स्कन्दस्वामिनोक्तं यत्–**"सपर्णाः वा सततगन्तारो रश्मयः पुत्राः...."** इति।[7] दुर्गाचार्यस्योक्तिर्यथा–**"सपर्णा हि तस्य रश्मयो**

**मुहुर्तमप्यनवस्थायिनो यस्य पुत्राः सोऽयं सप्तपुत्रः”**। [8] अन्तिमरूपेणोक्तं यास्काचार्येण यदादित्यः सप्तसंख्यकः पुत्रविशिष्ट इत्यपि भवितुमर्हति। सप्त इत्युक्ते सृप्तः, षडितिसंख्याया अतिरिक्तसंख्याविशेषः द्योत्यते। प्रसङ्गेऽस्मिन् स्कन्दस्वाम्युक्तवान्– **“सृप्ताः संख्या गता षड्भ्यः सकाशात्”** इति। [9] दुर्गाचार्येणापि उक्तं यत्– **“सृप्ता संख्या षड्भ्यः सकाशात्”** इति। [10] षट् इति संख्याया उत्तरवर्तिसंख्यैव सप्त इति। पुनश्चादित्यरश्मयः सप्त इत्यपि मन्त्रविदो वदन्ति मन्यन्ते।

पूर्वोक्तालोचनादेवं ज्ञायते यत् सूर्यस्य सप्त रश्मयः सन्ति, न त्वेक इति। अस्य मतस्यानुवृत्तिराधुनिकविज्ञानभावनायामपि दृश्यते। तत्राप्युच्यते यत् सूर्यरश्मिः सप्तवर्णानां समाहाररूपो श्वेतवर्णविशिष्टो यौगिकालोकविशेषो न मौलिकालोक इति। प्रसङ्गेऽस्मिन् पदार्थविदां परिक्षा–पर्यवेक्षणलब्धसिद्धान्तं यथा आपातश्वेतवर्णविशिष्टः सूर्यरश्मि केनचित्प्रिजमाकृतिविशिष्टेन प्रतिसारकमाध्यमेन गमनकाले प्रतिसृतं भूत्वा सप्तेषु मौलिकवर्णेषु विश्लिष्टं भवति। विषयोऽयं वर्णालीति नाम्ना ज्ञायते। आलोकरश्मेर्विच्छुरणेनोऽयं संभवतीति। तत्र वर्ण्याल्यां सप्तवर्णेषु लोहितवर्णस्य किरणस्य गतिवेगः सर्वाधिको भवति, तस्मादस्य वर्णस्य कृते कस्यचिद् माध्यमस्य प्रतिसराङ्कं सर्वनिम्नं भवति। किन्तु नीललोहितवर्णस्य गतिवेगः सर्वनिम्नो भवति, अतो तस्य कृते प्रतिसराङ्कं सर्वाधिकं भवति। तेन प्रिजममाध्यमेन गमनकाले रक्तवर्णस्य च्यूतिः सर्वाधिकः, पुनश्च नीललोहितवर्णस्य सर्वनिम्नो भवतीति। इतरेषां वर्णानां च्यूतिर्लोहितनीललोहितर्वर्णयोरन्तर्वर्त्ती स्यात्। तस्मिन्वर्णाल्यां क्रमेण नीललोहित–नील–आकाशि–हरित्–पीत–कृष्ण–लोहितानां वर्णानां समाहारो दृश्यते। एवं प्रकारेण वृष्टेरनन्ताद् वर्षणकाले वा नभस्यिन्द्रधनुषोत्पत्तिर्भवति। तत्रापि वायुमण्डलाास्थितैर्बर्तुलाकारैर्जलकणायैः सूर्यरश्मेर्विच्छुरणं भवतीति मन्यते।

**<u>आदित्याद्वैश्वानराग्नेरुत्पत्तिः–</u>**

यास्काचार्यः तस्य विरचिते निरुक्तमिति निर्वचनशास्त्रे वैश्वानरशब्दस्य निर्वचनादनन्तरं तस्योत्पत्तिविषये पूर्वाचार्यस्य निरुक्तकारस्य शाकपूणेर्मतमुल्लिखितम्। तेनोक्तं यदादित्याद्वैश्वानराग्नेरुत्पत्तिर्भवति। प्रसङ्गेऽस्मिन् तस्योक्तिर्यत्–

**अथादित्यात्। उदीचि प्रथमसमावृत्त आदित्ये कंसं वा मणिं वा परिमृज्य प्रतिस्वरे यत्र शुष्कगोमयसंस्पर्शयन् धारयति तत् प्रदीप्यते सोऽयमेव संपद्यते।**[11]

अर्थादेवं प्रकारेणादित्यात्पार्थिवाग्नेरुत्पत्तिः, तद्यथा– आदित्यस्योत्तरायणकाले यदि कंचित्कंसमेकं मणिं वा परिमृज्यादित्यलोके शुष्कगोमयस्य किंचिद्दूरे प्रत्युपतापे स्थाप्यते, तर्हि सूर्यरशिः तस्मिन् कंसौ मणौ वा केन्द्रिभुतो भवति। प्रसङ्गेऽस्मिन् दुर्गाचार्येणोक्तं यत्– प्रतिस्वरे प्रत्युपतापे इति। स्कन्दस्वामिन उक्तिर्यथा– प्रतिस्वरोऽपि रश्म्युपतापादयः। ततः शुष्कगोमयं दहतीति। एवं प्रकारेण योऽग्निरुत्पद्यते सो वैश्वानराग्निः पार्थिवाग्निर्वेति।

निरुक्तकारस्य मतस्यानुरूपभावनार्वाचीनविज्ञानभावनायामपि दृश्यते। वैज्ञानिकानां मतानुसारेण प्रत्यहः सूर्यरश्मिरधिकपरिमाणं शक्तिं वहति भूपृष्ठमुत्तपति च। यदि सूर्यालोके एकस्य पृष्ठस्योपरि किंचिद्दूरे एकं विबर्धकवस्तु स्थाप्यते, तर्हि सः सूर्यरश्मिः विबर्धकवस्तुन उत्तललेन्स् इत्यस्योपरि प्रतिफलनेनैकस्मिन्विन्दौ मिलितं भवति। तस्यामवस्थायां पृष्ठं गते सति तत् २३३०सेन्टिग्रेड् इति तापेन दग्धं भवति। अयं तापः पृष्ठस्य प्रज्वलनतापादधिको भवति। अतो वक्तुं शक्यते यद् निरुक्तकारस्य शाक्पूणेरुक्तिरियमाधुनिकविज्ञानभावनाया बीजस्वरूपमिति।

**<u>अग्निशब्दः–</u>**

आचार्येण यास्केन तस्य विरचिते निरुक्तमिति निर्वचनशास्त्रे अग्निशब्दस्य निर्वचनरूपेणोक्तं यत्–

**अग्निः कस्मात्? अग्रणीर्भवति, अग्रं यज्ञेषु प्रणीयते, अङ्गं नयति सन्नममानः।**[12]

कस्मादग्निशब्दस्योत्पत्ति इत्यस्मिन् प्रसङ्गे तेनोक्तं– योऽग्रणीः प्रधानो वा भवति। अग्र इति शब्दः नीधातुश्च मिलित्वाग्निशब्दं निष्पादयति, अर्थाद् अग्रणी इत्यस्माद् अग्निशब्दो

जायते; अग्निर्देवानां मुख्यो वा सेनानीर्भवति। रणाङ्गनेषु सेनापतिवद् अग्निर्वेदेष्वपि अग्रणीर्भवतीति। प्रसङ्गेऽस्मिन् स्कन्दस्वामिनोक्तं यत्– **"अग्निरग्रणीः प्रधानो देवतानाम्"**।[13] द्वितीयनिर्वचनरूपेणोक्तं यद्– यज्ञेष्वग्रं प्रणीयते। अग्र इत्युपपदेन सह नी इति धातोर्योगेन अग्निशब्दो जायते। तस्यार्थो भवति यज्ञेष्वग्न्याधानमेव प्रथमं कार्यमिति। वृत्तिकारेण दुर्गाचार्येणापि उक्तं यत्– **न तावत् किंचिदप्यन्यत् क्रियते यावदयं न प्रणीयते।**[14] तृतीयनिर्वचनानुसारेण अङ्ग इति शब्दाद् नी–प्रत्यययोगाद् अग्निरिति शब्दो जायते। अस्य शब्दस्यार्थो यदग्निः तृणकाष्ठादिषु सन्नते सति तान् स्वाङ्गरूपेण गृह्णात्यर्थाद्दाह्यरूपेण दहतीति। वृत्तिकारेण दुर्गाचार्येणाप्युक्तं यत्– **"तृणे काष्ठे वा यत्र संनमयति आश्रयति तदात्मनोऽङ्गतां नयति आत्मसात् करोतीत्यर्थः"**।[15] अपि चोक्तं तेन यत्– **"यत्रायं संनमयति वैदिके वा लौकिक वार्थे तत्र संनममान एवात्मानं प्रधानीकृत्य सर्वमन्यदात्मनोऽङ्गतां नयति गुणीकरोतीत्यर्थः"**।[16] अर्थाद् वैदिकेषु लौकिकेषु वा कर्मषु यदाग्निः प्रणीयते तदा स इतरपदार्थान् स्वाङ्गरूपेण गृहीत्वा स्वयं प्रधानो भवतीति।

यास्काचार्यस्य पूर्वाचार्यः स्थौलाष्ठीविमहोदयोऽपि निर्वचनं कृतमग्निशब्दस्य। उक्तं यत्–

**अक्नोपनो भवतीति स्थौलाष्ठीविर्न क्नोपयति न स्नेहयति।**[17]

अर्थात् तस्य नये तु अग्निशब्दो णिजन्तात् स्नेहार्थकात् क्नूयी इति धातोर्निष्पन्नः। न क्नोपयति अर्थाद् न स्नेहयति, रुक्षतां संपादयतीति। अग्निः काष्ठादिकं रुक्षयति न स्नेहयतीति हि तस्य प्रधानो धर्म इति सिद्धान्तितम्।

यास्काचार्यकृतं तृतीयनिर्वचनमद्यतनीयविज्ञानभावनाया बीजस्वरूपमिति। यतो हि, पदार्थविदां मतानुसारेण जगत्यस्मिन् सर्वेषु वस्तुषूष्णता(Temperature) विद्यते। उष्णता इत्युक्ते कस्यचिद् वस्तुनः (Substance) परिमण्डलस्य (Environment) वा उच्चतापशैत्ययोः परिमापविशेषा द्योत्यते। अग्निः तेजोरूपेण पार्थिववस्तुषु स्थित्वा विशेषतेजोमयवस्तुरूपेण तान् परिणामं ददाति पुनश्च तेषु प्रधानो भवति। अपि च अत्यधिकतापविशिष्टोऽग्निः तृणकाष्ठादिषु संनते सति स्वप्रधानरूपेणैव तान् दाहयतीति।

******

**आकरनिर्देशः**

---

[1] ठाकुरः (संपा.), नि. ४/३/३, पृ. ४६५।

[2] ल.स्व. (संपा.), नि. भा. ४/३, पृ. २००।

[3] नि. ४/३/३, दुर्गाचार्यवृत्तिः।

[4] ठाकुरः (संपा.), नि. ४/२६/७, पृ. ५६९।

[5] ल.स्व. (संपा.), नि. भा. ४/२६, पृ. २७९–२८०।

[6] तत्रैव।

[7] तत्रैव।

[8] ज़ा.शा. (संपा.), नि. ४/४, पृ. २५०।

[9] ल.स्व. (सम्पा.), नि. भा. ४/२६, पृ. २८०।

[10] ज़ा.शा. (संपा.), नि. ४/४, पृ. २५०।

[11] ठाकुरः (संपा.), नि. ७/२३/१७, पृ. ९१४।

[12] तदेव ७/१४/३, पृ. ८८६।

[13] ल.स्व. (संपा.), नि.भा. ७/१४, पृ. ३८०।

[14] ज़ा.शा. (संपा.), नि. ७/५, पृ. ४३०।

[15] तदेव ७/५, पृ. ४३१।

[16] तदेव ७/५, पृ. ४३०।

[17] ठाकुरः (संपा.), नि. ७/१४/५, पृ. ८८७।

# षष्ठोऽध्यायः

## उपसंहृतिः

अन्तिमाध्याये शोधकर्मण उपसंहृतिः स्वल्पेनोपस्थाप्यते। मुखबन्धे उपोद्घाते च मम प्रबन्धस्य लक्ष्यमुद्देश्यं च किंचिद् वर्ण्येते। अत्र संपूर्णालोचनानुसारेण ये सिद्धान्ताः तत्त्वसमूहाः वा प्राप्यन्ते ते मया क्रमेणोल्लिख्यन्ते।

द्वितीये अध्याये वेदाङ्गेषु निरुक्तस्य स्थानमालोच्यते। तत्र षड् वेदाङ्गान्यालोचितान्यपि चान्तिमे निरुक्तवेदाङ्गस्य प्रयोजनसमूहो व्याख्यायते। अपौरुषेयवेदानामध्ययन–अध्यापना–मनन–अर्थबोधेषु सहायकरूपेण वेदाङ्गानि ऋषिभिर्विरचितानि। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषं चेति षट्संख्यकानि वेदाङ्गानि। तत्र शिक्षाछन्दोभ्यां वैदिकमन्त्राणां सम्यक् पाठः संभवति। कल्पज्योतिषे वैदिकयागानुष्ठाने सहायके भवतः। निरुक्तव्याकरणाभ्यां वैदिकमन्त्राणामर्थबोधः संभवति। अतो ज्ञायते यत् सर्वेषां वेदाङ्गानामेककरूपेण युग्मरूपेण वा विशेषं गुरुत्वमस्ति, तथापि निरुक्तं सर्वेषामग्रे स्थापनीयम्। यतो ह्यर्थं विना कस्यापि किमपि मूल्यं नास्ति। अर्थवोधं विना पदानां विभागोऽपि न संभवति। पुनश्चार्थं न ज्ञात्वा वैदिकमन्त्राणां पाठो यज्ञानामनुष्ठानं चायथार्थरूपेण प्रतिपाद्येते। यद्यपि व्याकरणमपि वेदार्थबोधे सहायकम्, तथापि निरुक्तेनैव तस्य पूर्णताविधानं स्यात्। व्याकरणान्तर्गतयोः स्वर–संस्कारयोर्निर्णयमर्थसापेक्षम्। निरुक्तादेव तद् जायते। तस्मादिदं वक्तुं शक्यते यद् वेदानां सम्यग्ज्ञानार्थं निरुक्तं वेदाङ्गेषु भित्तिस्वरूपमिति।

तृतीयाध्याये दृश्यते यद् निरुक्तकारैर्वैदिकमन्त्रान्तर्गतशब्दरूपेणानेकविधानाम् उद्भिद्देहाङ्गवाचकानां प्राणिवाचकानामणुजीववाचकानां पुनश्च मानवदेहाङ्गवाचकानां शब्दानां निर्वचनं कृतम्। उद्भिद्देहाङ्गवाचकानां शब्दानां निर्वचनात् तेषां मूलादीनामङ्गानां वैशिष्टानि ज्ञायन्ते। प्राणिवाचकानामणुजीववाचकानां शब्दानां निर्वचनात्तेषां खाद्याभ्यासः शिकारपद्धतिः गमनवैशिष्टं प्रजननविषयकं च तत्त्वं प्राप्यन्ते, यत् तद्विषयकविज्ञानशास्त्रेषु

वर्ण्यते। पुनश्च मानवदेहाङ्गवाचकानां शब्दानां निर्वचनात् चक्षु–कर्ण–शिरस्–चर्म–जरायु–नाभ्यादीनामङ्गानां कार्याणि द्योत्यन्ते। किंच बधिरः अन्धः कान इत्यादीनि रोगविषयकानि प्राथमिकज्ञानान्यपि तस्माद् ब्योध्यन्ते।

चतुर्थे तु दृश्यते यद् निरुक्तकारैर्भौगोलिकविषयवाचकानां शब्दानां व्युत्पत्तिरपि प्रदर्श्यते। नक्षत्राणि गतिविशिष्टानि, चन्द्रस्य स्वर्दीप्तिर्नास्ति सूर्यालोकेनैव दीप्तिमानो भवति, मेघो वृष्टेर्कारणम्, गङ्गादर्शा नदी, यमुना च तस्या उपनदी, अवश्या रात्रावेव दृश्यते इत्यादयो भौगोलिकविषयाः अत्रोपस्थाप्यन्ते। इमे विषया अर्वाचीनभूगोलशास्त्रेऽपि विद्यन्ते।

पञ्चमे अध्याये तु भौतवैज्ञानिकतत्त्वान्यालोचितानि। तत्रापि सप्तपुत्रमिति शब्देन सप्तरश्मियुक्तमादित्यं द्योत्यते। अर्थात् सूर्यस्य सप्त रश्मयः सन्ति। अतः सुर्यरश्मिः सप्तवर्णरूपः सप्तरश्मिविशिष्टो यौगिकालोक इति ज्ञायते। पुनश्च सूर्यरश्मिः सर्वाधिकगतिसंपन्न इति वैज्ञानिकतत्त्वमपि तत्रालोच्यते। अपि च सूर्यरश्मिः कस्मिंश्चिद् विवर्धकवस्तुनि केन्द्रीभूतः सन् अधिकतेजोमयमग्निरूपं प्राप्नोति। एवं विधानि तत्त्वानि अत्रालोच्यते।

अतो दृश्यते यद् निरुक्तकारैः कृता विज्ञानभावना अद्यतनीयविज्ञानचिन्तनेऽपि तुल्यरूपेण विराजते। तस्मादिदं वक्तुं शक्यते यन्निरुक्तमेतेषां वैज्ञानिकशास्त्राणां बीजस्वरूपमिति।

यथासाध्येन चेष्टया प्रबन्धोऽयं मयोपस्थाप्यते। उत्तरकालेऽप्येतादृशं विषयमवलम्ब्य गवेषणाकार्यं कर्तुमिच्छामि। उत्तरकालिकगवेषकानां सकाशे विषयोऽयं नवदिगन्तमुन्मोचयिष्यतीति मन्यते, पुनश्चाधुनिकविज्ञानचिन्तनमपि समृद्धं करिष्यति।

******

# Select Bibliography


Bala, Sujan Kumar. *Jīvanvijñān(a) O Pariveś(a).* Kolkata: Ghosh and Chakravarti, 2018 (rpt.) (1st ed. 2014).

Bandyopadhyay, Dhirendranath. *Saṃskr̥ta Sāhityer Itihāsa*. Kolkata: West Bengal State Book Board, 2010 (rpt.) (1st ed. 1988).

Bandyopadhyay, Shanti. *Vaidik(a) Sāhityer(a) Rūparekhā*. Kolkata: Sanskrit Pustak Bhander, 2003 (rpt.) (1st ed. 1993).

Bhaṭṭojidīkṣita. *Siddhāntakaumudī.* Vol. 3. Ed. Binodlal Sen. Kolkata: Sadesh, 2005 (rpt.) (2nd imp.).

Chattopadhyay, Satyendramohan. *Sahaj(a) Kathāy(a) Vijñān(a).* Kolkata: Modern book Agency Pvt. Ltd., 1994 (rpt.) (1st ed. 1989).

*Daivatabrāhmaṇam*. Ed. Jibananda Vidyasagara Bhattacharya. *Daivatabrāhmaṇam Tathā Ṣaḍviṃśabrāhmaṇam*. with Sāyaṇācārya's comm. Kolkata: Saraswati Press, 1881 (2nd ed.).

Dutta, Anu, and Sarojkumar Pal. *Prakr̥ti, Mānuṣ(a) O Saṃpada*. Kolkata: Manasi Press, 2001 (rpt.) (26th ed.).

*Jīvanvijñān(a) O Paribeś(a) Paricaya*. Ed. Dulal Chandra Santra. Kolkata: Santra Publication, 2015. Kolkata: Sanskrit Book Depot, 2012 (rpt.) (1st ed.).

Kotpal, R. L. *Modern Text Book of Zoology Invertebrates*. New Delhi: Rastogi Publications, 2015-2016 (1st rpt., 11th ed.).

Max Müller, Friedrich. *A History of Ancient Sanskrit Literature*. New Delhi: Asian Educational Services, 1993 (rpt.) (1st pub. 1859).

*Muṇḍakopaniṣat*: *Anandagirikr̥taṭīkāsaṃvalita Śāṁkarabhāṣyasametā*. Ed. Harinārāyaṇa Āpte. Anandashramamudranalaya, 1918 (4th rpt.). (Anandashrama Sanskrita Granthavali Granthanka 9).

Musalgaonkar, Gajananshastry, and Rajeshwar(Raju) Shastry Musalgaonkar. *Vaidika Sāhitya kā Itihāsa*. Varanasi: Chaukhambha Sanskrit Sansthan, 2009 (rpt.). (The Kashi Sanskrit Series 275).

*Niruktaślokavārttika*. Ed. Vijay Pal. Kolkata: Srimati Savitridevi Bagadiya Trust, 1982.

Paṇini. *Paṇinīya Śikṣā*. Ed. and Trans. Pradip kumar Ghosh. Kolkata: Sanskrit Pustak Bhander, 1394 BY.

Patañjali. *Mahābhāṣya*. Ed. Karunasindhu Das. *Pāṇinīya Mahābhāṣya*. With Beng. Trans. of Moksadacharan Samadhayi. Kolkata: Sadesh, 2005.

Raychowdhuri, Asitendu, Manoj Kumar Ghosh, and Govinda Chandra Dalal. *Bhūgol(a) Paricaya*. Kolkata. Santra publication, 2006 (rpt.) (1st ed. 2004).

Sāyaṇa. *R̥gveda-Bhāṣyabhūmikā*. Ed. With Beng. Trans. Gurushankara Mukhopadhyaya. *R̥gvedabhāṣyopakramah*. Kolkata: Sanskrit Book Depot, 2009 (rpt.) (1st ed. 2005).

___.___. Ed. With Hindi comm. Sharada Chaturvedi. *R̥gveda-Bhāṣyabhūmikā*. Sharadi. Varanasi: Chowkhamba Krishnadas Academy, 2016 (rpt.). (Krishnadas Sanskrit Series 58).

___. ___. Ed. and Beng. Trans. Gurushankar Mukhopadhyaya. *R̥gvedabhāṣyopakramaḥ*. Kolkata: Sanskrit Book Depot, 2009 (rpt.) (1st ed 2005).

Sen, Kunal, Trilochana Midya, and Dulal Chandra Santra. *Uccatarajīvavidyā*. Kolkata: Santra Publication Pvt. Ltd., 2015 (rpt.) (1st ed. 2013).

Skandasvami, and Mahesvara. *Nirukta-bhāṣya-tīkā*. Ed. Jnanaprakash Shastri and Naresh Kumar. Delhi: Parimal Publication, 2012 (2nd ed.). (Parimal Sanskrita Granthamala- 104).

___. *Niruktabhāṣyaṭīkā. Vol. 3 and 4.* Ed. Lakshman Sarup. With intro. Lahore: The University of The Panjab, 1934.

___. *Niruktabhāṣyaṭīkā*. Ed. Lakshman Sarup. Lahore: The University of The Panjab, 1931.

*Taittirīya-Saṃhitā*. Ed. Maitreyee Deshpande. *Kr̥ṣṇayajurvedīya Taittirīya-Saṃhitā*. Vol. 5. With comm. of Sāyaṇācārya. Delhi: New Bharatiya Book Corporation, 2012.

*Taittirīyopaniṣad*. Trans. and ed. Durgācaraṇa-Sāṃkhyavedāntatīrtha. *Kr̥ṣṇayajurvedīyā Taittirīyopaniṣad* with Śāṁkarabhāṣya.Vol. 1 and 2. Kolkata: Devasahitya Kutir, 1347 BY (rpt.) (3rd ed.).

*Ūnaviṃśati Saṃhitā*. Ed. Ashok kumar Bandyopadhyaya. With Beng. Trans. and Notes of *Pañcānan Tarkaratna*. Kolkata: Sadesh, 2018 (1st ed.).

*Upaniṣad Granthāvalī. Vol. 1*. Ed. Swami Gambhirananda. Kolkata: Udbodhana Karyalaya, 2015 (rpt.) (7th ed. 1962).

Vidyasagar, Ishwarchandra. *Samagra Vyākaraṇ(a) Kaumudī.* Ed. Hemchandra Bhattacharya. Kolkata: Chalantika Prakashak , 1416 BY (12th rpt.) (1st ed. 1370).

Yāska. *Nirukta*. Ed. Amareswara Thakur. With Beng. Trans. and Notes. Part 1. Kolkata: University of Calcutta, 2017 (rpt.) (1st ed. 1955). (The Asutosh Sanskrit Series No. 5).

___.___. Ed. Amareswara Thakur. With Beng. Trans. and Notes. Part 2. Kolkata: University of Calcutta, 2005 (rpt.) (1st ed. 1955). (The Asutosh Sanskrit Series No. 5).

___.___. Ed. Amareswara Thakur. With Beng. Trans. and Notes. Part 3. Kolkata: University of Calcutta, 2016 (rpt.) (1st ed, 1955). (The Asutosh Sanskrit Series No. 5).

___.___. Ed. Amareswara Thakur. With Beng. Trans. and Notes. Part 4. Kolkata: University of Calcutta, 2005 (rpt.) (1st ed. 1955). (The Asutosh Sanskrit Series No. 5).

___.___. Ed. and Eng. Trans. Lakshmana Swarupa. With Hin. Trans. Satyabhushana Yogi. *Nighaṇṭu Tathā Nirukta*. Delhi: MLBD, 1985 (rpt.) (1st ed. 1967).

___.___. Ed. Brahmachari Medhachaitanya. Kolkata: Sanskrit Pustak Bhander, 1424 BY (1st ed.).

___.___. Ed. Mukunda Jha Bakshi. With comm. *Niruktavivṛtti*. Delhi: Chowkhamba Sanskrit Prathisthan, 2016 (rpt.).

___.___. Ed. Taraknath Adhikari. *Yāska's Nirukta (Chapter 1).*With Beng. Trans. and exposition. Kolkata: Sanskrit Book Depot, 2012 (rpt.) (1st ed. ?).

___.___. Ed. Uma Shankar Sharma. With Hin. Trans. and Notes. Varanasi: Chowkhamba Vidya Bhavan, 1961 (?). (Vidyabhawan Sanskrit Series No. 57).

___.___. *Nirukta*. Ed. *Jnanaprakash Shastri*. With Durgācārya's Comm. *Ṛjvarthākhya Vṛtti*. Delhi: Parimal Publications, 2016 (1st ed.). (Parimal Publication Series No. 153).

## Internet sources


https://www.livescience.com

https://www.webmd.com

https://en.m.wikipedia.org

https://www.indiawilds.com

https://sciencing.com

https://sciencedaily.com

https://animalfactguide.com

https://www.smithsonianmag.com

https://owlcation.com

https://www.tigersofindia.com

https://www.chop.edu

https://www.medicinenet.com

https://www.healthline.com

https://www.myupchar.com

https://medbroadcast.com

https://www.merriam-webster.com

https://en.wikipedia.org

https://wildlifecenter.org

https://animals.net

https://www.allaboutbirds.org

https://www.tigers.org

https://www.wildrepublic.com

https://www.news-medical-net

https://animalfactguide.com

https://blog.londolozy.com

www.reptilesmagazine.com

https://www.petmd.com

https://a-z-animals.com

https://www.peta.org

https://radicalbotany.com

https://www.medicalnewstoday.com

https://www.topmarks.co.uk

https://news.nationalgeographic.com

https://www.researchgate.net

https://www.whatarethe7continents.com

https://ascelibrary.org

https://www.quora.com

https://www.wwf.org

https://wwf.panda.org

https://www.mapsofindia.com

https://www.cliffsnotes.com

https://www.pmfias.com

https://janiyescience.blogspot.com

https://www.popsci.com

https://brilliant.org

https://www.allaboutvision.com

https://www.britannica.com

https://www.colgate.com

www.biologydicussion.com

https://www.ck12.org

www.arvindguptatoys.com

https://www.pets4homes.co

www.drsfostersmith.com

https://en.oxforddictoinaries.com

******